श्री कनरइतिएतयोर्योगिज्ञानिनोर्मध्ये देवानां माम्मतां ब्रह्मप्राप्तिः आत्मा ह्येषां स भवतीति श्रुतेः एषां देवानां सः विदानितिश्रुति पदयोरर्थः धावतोः यतमानयोः कः पूर्वं

१८० कृतकृत्यो भवतीत्यर्थः १ उत्तरं अनिकेत इति संयतः साधारणध्यानसमाधिमान् गृहस्थेष्वपि सर्वसंयतः २ अनिकेतो भिक्षुर्गृहस्थो वा योगी मुच्यत इति पूर्वार्धार्थः

ज्ञानी पूर्वोक्तरूपस्तु सद्योमुच्यत इत्युत्तरार्धार्थः। अयं भावः ज्ञानिनः श्रुतियुक्तिभ्यां जगन्मिथ्यात्वनिश्चयात् क्षणिकेनापि निर्विकल्पसाक्षात्कारेण ब्रह्माद्वैतनिश्चयो भ

वति योगिनस्तु तदभावान्निर्विकल्पसमाध्यभ्यासबलेनैव द्वैतविस्मरणं संपादनीयमिति तावल्लंबा च्छन्नसाध्या मुक्तिरिति। असिम्नस्मिन्नजन्मन्यलब्धोत्तमभूमेः जन्मांतरेति

अष्टकउ च कनरस्त्वनयोः पूर्वं देवानामेति साम्मतां उभयोर्धावतो राजन्सूर्याचंद्रमसोरिव १ ययातिरु च अनिकेतो गृ

हस्थेषु कामवृत्तेषु संयतः ग्राम एव वसन्भिक्षुस्तयोः पूर्वतरं गतः २ अप्राप्य दीर्घमायुस्तु प्राप्तो विकृतिं चरन् तप्यते यदि

तत्कृत्वा चरन्मोक्षं तत्र पश्चात् ३ पापानां कर्मणां नित्यं बिभ्यद्यस्तु मानवः सुखमप्याचरन्नित्यं सोनन्तं सुखमेधते ४ ॥ ॥

पितल्लाभो लीनामाह। अप्राप्येति आयुः साधनं कालं वा दीर्घं तत्र विधनिष्ठापर्याप्तं विकृतिं दिव्या दिव्या दिव्यविषयभोगं योगसिद्धिबलेन चरंस्तत्सोपि सोमर्यादिवस्तृ

न्तापं प्राप्नुवन् स्तु नैयोगं चरंति इह जन्मनि जन्मांतरे वा योगभ्रष्टस्मृतिप्रमाणादिरित्यर्थः ३ ज्ञानिनस्तत्र आस्तिक्यमाह। पापानामिति यस्तु मानवो ज्ञानी नित्यं अविना

शिवस्तु ब्रह्माख्यं बिभ्यत्तत्रमसीति शास्त्राप्तम अस्ति नावधारयेत्। स यः पापानां कर्मणां कर्मणि षष्ठी। तानि सुखं यथेष्ठ आचरन्नपि मुच्यत एवेत्यर्थः न लिप्यते कर्मणा पापके राम०

नहन्त्यपि स इमाल्लोकान्न हन्ति न निबध्यत इत्यादिशास्त्रात् ४ ॥ १८०

इदंपदमप्राप्तो मोक्षेच्छया धर्ममेव सेवेत तं नाहं तत्र वाहति । यः पुरुषोनर्थबुद्धिः नास्ति अर्थे मोक्षे बुद्धिर्यस्य स तथाभूतः सन् स्वर्गाद्यर्थं धर्मं सेवेत तं नैव वने त्वं शंसं असत्तं च मुमुक्षाहीनत्वा
दनित्यफलत्वाच्च विविदिषंति यज्ञेन दानेनेत्यादिश्रुतिसिद्धं धर्मस्य मोक्षहेतुत्वं परित्यज्य कामाय धर्मं कृत आत्मानं नानादुःखभये संसारे पातयित्वा घ्नंतीत्यर्थः । एवमनीशस्याजितेंद्रिय
स्यार्थधनमपि न शंसमसत्तं चाय न्नमोक्षार्थं करणं तदार्जवं कर्मणामुचितं फलं तदेव समाधिः योगसिद्धिमंलं तदार्यं तदेवगमं प्राप्यं ज्ञानसाधनमित्यर्थः । कृतगो अ

तद्वै न शंसंति सदस्सु सभ्या हुर्यः सेवते धर्ममनर्थबुद्धिः । अर्थोप्यनीशस्य तथैव राजंस्तदार्जवं स समाधिस्तदार्यं ५ अष्टकउवाच । के
नासि दूतः प्रहितोसि राजन्युवा स्रग्वी दर्शनीयः सुवर्चाः । कुत आयातः कतरस्यां दिशि त्वमुताहोस्वित्पार्थिवं स्थानमस्ति ६ ययातिरु
वाच । इमं भौमं नरकं क्षीणपुण्यः प्रवेष्टुमुर्वीं गगनाद्विप्रहीनः । उक्त्वाहं वः प्रपतिष्याम्यनंतरं त्वरंति मां लोकपाला ब्रह्मणो ये ७ सतां स
काशे तु वृतः प्रपातस्ते संपतिता गुणवंतस्तु सर्वे । शक्राच्च लब्धो हि वरो मयैष पतिष्यता भूमितलं नरेंद्र ८ अष्टकउवाच । पृच्छामि त्वां
मा प्रपत प्रपातं यदि लोकाः पार्थिव संति मेत्र । यद्यंतरिक्षे यदि वा दिवि श्रिताः क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ॥ ॥ ॥ ॥ ॥

स्मात् आह लोरर्पितद्वयोरपि योगज्ञानमार्गयोर्मूलं निष्कामधर्मसेवेत्यर्थः ५ केन कतरस्यां दिशि प्रहितोसि सामन्वयः ६ विप्रहीणः च्युतः उक्त्वा आपृच्छ्य वः
युष्मान् ७ ८ प्रपातं पतित्वा मा प्रपत पातं मां प्राप्नुहीत्यर्थः कषाद्भिन्नात्क्रमप्रयोगः समन्तलब्धातं न्यवधीद् दर्शेऽस्मा स्विन्नलोकाः भोग्यविषयाः दिविमेन्तपृष्टे अंतरि
क्षेन क्षत्रमंडलादौ क्षेत्रसिद्धस्यानं तदभिज्ञं ९ ॥

१० आक्रमआक्रमस्व ११ ब्राह्मणोपिब्रह्मवितावेदविदेवप्रतिग्रहेववृत्तेनननत्वन्नः। अस्माद्विधस्तनैववव्रत्तेनिमर्षः १२ क्षपरणोयोत्नादैत्पयुक्तः वीरस्य
विषयादिग्विजयिनः पत्नीतत्रकर्मभ्रमोसाधुसत्कर्मविधित्समानः कर्तुमिच्छन्किमुकर्यंचरेयंनैवकुर्यामितिमर्षः। विवित्समानइतिपाठेतत्रस्वर्गेसाधुलघुमिच्छ

ययातिरु च यावन्तःपृथिव्यांविहितंगवाश्वंसहारण्यैःपशुभिःपर्वतैश्च तावल्लोकादिविनेसंस्पिप्लाः वैतयाविजानीहिनरेंद्रसिंह १०
अष्टकउ च तांस्तेददामिमाप्रपतप्रपातयेमेलोकादिविराजेह्संति पद्यंतरिक्षेयदिवादिविश्रितास्तानाक्रमक्षिप्रमपेतमोह ११ य
यातिरु च नास्मद्विधोब्राह्मणोब्रह्मविच्चप्रतिग्रहेवृत्तेतेराजमुख्य यथाप्रदेयंसततंद्विजेभ्यस्तथाददंपूर्वमहंनरेंद्र १२ नाब्राह्मणः
क्षपणोजातुजीवेद्याचापिस्याद्ब्राह्मणीवीरपत्नी सोहंनैवाकृतपूर्वंचरेयंविधित्समानः किमुतत्रसाधुः १३ प्रतर्दनउ च पृच्छामि
त्वांस्पृहणीयरूपप्रतर्दनोहंयदिमेसंतिलोकाः पद्यंतरिक्षेयदिवादिविश्रिताः क्षेत्रज्ञंत्वांतस्यधर्मस्यमन्ये १४ ययातिरु च संतिलो
कावहवस्तेननरेंद्रएकैकं सप्तसप्ताप्यहानि मधुच्युतोघृतपृक्ताविशोकास्तेनांतवंतः प्रतिपालयंति १५ प्रतर्दनउ च तांस्ते
ददानिमाप्रपतप्रपातयेमेलोकास्तवतेवैभवंतु पद्यंतरिक्षेयदिवादिविश्रितास्तानाक्रमक्षिप्रमपेतमोहः १६ ॥ ॥ ॥

न १३ १४ प्रत्येकंसप्तसप्ताप्यहानिसेवितास्मैतोनोततेतः मधुच्युतः सुखस्त्रवाः घृतपृक्ताः तेत्वांप्रतिपालयंतिप्रतीक्षंते १५ १६ ॥ ७ ॥

न्शंसेनिघं १७ १८ अन्यैः राजभिः यत्प्रतिग्रहाख्यं न कृतं तन्न अपूर्वं प्रथमं अहमेव कथं कुर्यामिति भावः १९ अध्यायः पृच्छामीति १ यत्पानतपते प्रकाशय
ति २ ३ शिशुमारप्रधानात्कालाच्चक्रात् शंकमानः अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तमित्युक्तं मिथ्याक्रयात्मकेकायथं दुस्तरमितिभा

ययातिरु च न तुल्यतेजाः सुकृतं कामये तद्योगक्षेमं पार्थिव पार्थिवः सन्नरदेवो देशाद्दापदं प्राप्य विधाम्यरेन्नृशंसं न हि ज्ञानतुराज्ञा
१७ धर्म्यं मार्गं यतमानो यशस्यं कुर्यान्नृपो धर्ममवेक्षमाणः नमद्विधो धर्मबुद्धिः प्रजानन् कुर्यादेवं कृपणं मां यथात्थ १८ कुर्या
दपूर्वं न कृतं यदन्यैर्विधित्समानः किमु तत्र साधु ब्रुवाणमेवं नृपतिं ययातिं नृपोत्तमो वसुमनाब्रवीति १९ इत्यादिपूर्वशिष्टउत्तर
यायाते वसुमानुवाच पृच्छामि त्वां वसुमानो षदश्विर्य घास्ति लोको दिवि मे नरेंद्र यद्यंतरिक्षे प्रथितो महात्मन् क्षेत्रज्ञं त्वां तस्य ध
र्मस्य मन्ये १ ययातिरु च यदंतरिक्षं पृथिवी दिशश्च यत्तेजसा तपते भानुमांश्च लोकास्तावंतो दिवि संस्थिता वै ते नांतवंतः प्रतिपा
लयंति २ वसुमानु च तांस्ते ददानि मा प्रपत प्रपाते ये मे लोकास्तव ते वै भवंतु क्रीणीष्वैतांस्तृणकेनापि राजन् प्रतिग्रहस्ते यदिधी
मन्नदुष्टः ३ ययातिरु च न मिथ्याहं विक्रयं वै स्मरामि वृथा गृहीतं शिशुकाच्छंकमानः कुर्यां न चैवाकृतपूर्वमन्यैर्विधित्समानः
किमु तत्र साधुः ४ ॥

वः शिशुकः शिशुमारे स्यादिति मेदिनी शिशुकाच्छंद्बालकादिति वा ४ ५ ॥ छ ॥ ॥ ॥ ॥ ॥

श्रा° १८२

परीप्समानान्याचकानन्नावमंस्यानावमानेकृतवानस्मि स्वनवंतः प्रख्यामाहस्तर्पः ७ ८ गंतारःमत्वामस्यामः नरकं मर्त्यलोकं १० यत्सर्वं कर्तुनाभिज्ञा

वसुमानु च नांस्त्वं लोकान्प्रतिपद्यस्व राजन्मया दत्तान्यदि नेष्टः क्रमस्ते अहं न तान्वै प्रतिगंता नरेंद्र सर्वे लोकास्तव ते वै भवंतु ५
शिबिरुवाच पृच्छामि त्वां शिबिरौशीनरोहं ममापि लोका यदि संतीह तात यद्यंतरिक्षे यदि वा दिवि श्रिताः क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये
६ ययातिरुवाच न यत्त्वं वाचा हृदयेनापि साधून्परीप्समानान्नावमंस्था नरेंद्र तेनानंता दिवि लोकाः श्रितास्ते विद्युद्रूपाः स्वनवंतो म
हांतः ७ शिबिरु च नांस्त्वं लोकान्प्रतिपद्यस्व राजन्मया दत्तान्यदि नेष्टः क्रमस्ते न चाहं तान्प्रतियत्स्येह दत्त्वा यत्र गत्वा नानुशोचं
ति धीराः ८ ययातिरु च यथा त्वमिंद्रप्रतिमप्रभावस्ते चाप्यनंता नरदेव लोकाः तथाद्य लोके न रमेन्यदत्ते तस्माच्छिबे नाभिनं
दामि दायं ९ अष्टकउवाच न चेदेकैकशो राजन्लोकान्नः प्रतिनंदसि सर्वे प्रदाय भवते गंतारो नरकं वयं १० ययातिरु
च यदर्हो हं तद्यतध्वं संतः सत्याभिनंदिनः अहं तु नाभिनंदामि यत्कृतं न मया पुरा ११ अष्टकउ च कस्यैते प्रतिदृश्यंते रथाः
पंच हिरण्मयाः यानारुह्य नरो लोकानभिवांछति शाश्वतान् १२ ययातिरु च युष्मानेते वहिष्यंति रथाः पंच हिरण्मयाः उच्चैः
संतः प्रकाशंते ज्वलंतोग्निशिखा इव १३ अष्टकउ च आतिष्ठस्व रथान्राजन्विक्रमस्व विहायसे वयमप्यनुयास्यामो यदा का
लो भविष्यति १४ ययातिरुवाच सर्वैरिदानीं गंतव्यं सह स्वर्गजितो वयं एष नो विरजाः पंथा दृश्यते देवसद्मनः १५ ॥ ॥

राम° १८२

नाभिनंगीकरोमि १२ प्रकाशंते दृश्यंते ज्वलंतो दीप्यमानाः १२ १३ १४ १५ ॥ ॥ ॥

१७ देवयानाय ब्रह्मलोकमार्गप्राप्तये यावत् सर्वस्वं अददत् सर्वस्वत्यागी सर्पः अश्वेपित्यशो नैवगन्ता इत्यार्पितं त्रेयं १८ सौम्यम क्रूरत्वं विधित्सा पालनेच्छा १९
सत्यमेव श्रेयः साधनमिति विधातुः पूर्वोक्तप्रश्नो नो अनुवदति अष्टाष्टकस्माद्दिना २० प्रकाशं प्राग्गुक्तमपि सम्यक्तरं २१ छादनं जीविकालेन परिधानं। अतीत

वैशंपायन उ च तेधिरुह्य रथान्सर्वे प्रयातान्नृपसत्तमाः आक्रमंतो दिवं भाभिर्धर्मेणावृत्य रोदसी १६ अष्टक उ च अहं मन्ये पूर्वमे
कोस्मि गंता सखा चेंद्रः सर्वथा मे महात्मा कस्मादेवं शिबिरौशीनरोयमेकोत्यगात्सर्ववेगेन वाहान् १७ ययातिरु च अददद्देवया
नाय यावद्वित्तमविंदत उशीनरस्य पुत्रोयं तस्माच्छ्रेष्ठो हि वः शिबिः १८ दानं तपः सत्यमथापि धर्मो ह्रीः श्रीः क्षमा सौम्यमथो विधित्सा
राजन्नेतान्यप्रमेयाणि राज्ञः शिबेः स्थितान्यनृशंसस्य बुद्ध्या एवंवृत्तो ह्रीनिषेधश्च यस्मात्तस्माच्छिबिरत्यगाद्वै रथेन १९ वैशंपा
यन उ च अथाष्टकः पुनरेवान्वपृच्छन्मातामहं कौतुकेनेंद्रकल्पं पृच्छामि त्वां नृपते ब्रूहि सत्यं कुतश्च कश्चासि सुतश्च कस्य कृ
तं त्वया यद्धि न तस्य कर्ता लोके त्वदन्यः क्षत्रियो ब्राह्मणो वा २० ययातिरु च ययातिरस्मि नहुषस्य पुत्रः पूरोः पिता सार्वभौमस्त्विहासं
गुह्यं चार्थं मामकेभ्यो ब्रवीमि मातामहोहं भवतां प्रकाशं २१ सर्वामिमां पृथिवीं निर्जिगाय प्रदाय मह्यं छादनं ब्राह्मणेभ्यः मेध्यानश्वाने
कशतान्सुरूपांस्तदा देवाः पुण्यभाजो भवंति २२ ॥

फलत्वादस्य स्वधर्मस्य स्वमुखेन कीर्तनं न दोषः। अन्यथा धर्मः क्षरति कीर्तनादिति ज्ञेयः श्रेयसे स्यात् नमस्ये हं त्वा विपिनं ब्राह्मणेभ्य इति पाठे ब्राह्मणेभ्यो दत्वा विपि
नं वनं प्रस्थेहं प्रस्थानं कृतवानस्मि। अभ्यासलोप आर्षः मेध्यानश्वान् सदा देवभाउ तस्य उपजंति तदा देवास्तं पुण्यवंतं भजंतीत्यर्थः २२ ॥ ॥ ॥

५

भा: १८३

१७ ३ श्री म वा प्र रा पी धु ध च दृ वं वं श्रीगोविंदसूरिसूनोः श्रीनीलकंठस्य कृतौ भारतभावदीपे उत्तरयायातार्थप्रकाशः भगवन्निति ५ चतुरं

अदामहं पृथिवीं ब्राह्मणेभ्यः पूर्णामिमामखिलां वाहनेन गोभिः सुवर्णेन धनैः पशुमुख्यैस्तदा दंदं गा शतमर्बुदानि २३ सत्येन मे द्यौ
श्च वसुंधरा च तथैव चाग्निर्ज्वलते मानुषेषु न मे वृथा व्याहृतमेव वाक्यं सत्यं हि संतः प्रतिपूजयंति २४ यदष्टकं प्रब्रवीमीह सत्यं प्रतर्दनं चौ
षदश्विं तथैव सर्वे च लोका मुनयश्च देवाः सत्येन पूज्या इति मे मनोगतं २५ यो नः स्वर्गजितः सर्वान्यथावृत्तं निवेदयेत् अनसूयुर्द्वि
जाग्र्येभ्यः स लभेन्नः सलोकतां २६ वैशंपायन उवाच एवं राजा स महात्मा ह्यतीव स्वैर्दौहित्रैस्तारितोमित्रसाहः त्यक्त्वा महीं पर
मोदारकर्मा स्वर्गं गतः कर्मभिर्व्याप्य पृथ्वीं इत्यादिपर्वणि उत्तरयायाते समाप्तं जनमेजय उ॰ च भगवंछ्रोतुमिच्छामि पूरोर्वं
शकरान्नृपान् यद्वीर्यान्यादृशांश्चापि यावंतो यत्पराक्रमान् १ न ह्यस्मिंछीलहीनो वा निर्वीर्यो वा नराधिपः प्रजाविरहितो वा
पि भूतपूर्वः कथंचन २ तेषां प्रथितवृत्तानां राज्ञां विज्ञानशालिनां चरितं श्रोतुमिच्छामि विस्तरेण तपोधन ३ वैशंपायन उ॰ च
हंत ते कथयिष्यामि यन्मां त्वं परिपृच्छसि पूरोर्वंशधरान्वीरान्शक्रप्रतिमतेजसः भूरिद्रविणविक्रांतान्सर्वलक्षणपूजितान् ४
प्रवीरेश्वररौद्राश्वास्त्रयः पुत्रा महारथाः पूरोः पौष्ट्यामजायंत प्रवीरो वंशकृत्ततः ५ मनस्युरभवत्तस्माच्छूरसेनीसुतः प्रभुः पृथि
व्याश्चतुरंताया गोप्ता राजीवलोचनः ६ ॥

तायाः चतुः समुद्रावच्छिन्नायाः ६ ॥ ॐ ॥ श्रीरामो जयति ॥ छ ॥

राम १
१८३

२० वितथ्यंविगतस्त्याभावोजनकस्माद्दृश्यंयत्रतत्राद्दशंपुत्रजन्म २१ २२ २३ २४

शङ्कुःसंहननोवाग्मीसौवीरीतनयास्त्रयः ७ मनस्योरभवन्पुत्राःशूराःसर्वेमहारथाः अपमानुप्रमत्तयोमिस्त्रकेशपांमनस्वि
नः ८ रौद्राश्वस्यमहेष्वासादशाप्सरसिसूनवः यज्वानोजज्ञिरेशूराःप्रजावंतोबहुश्रुताः ९ सर्वेसर्वास्त्रविद्वांसःसर्वेधर्मपरा
यणाः ऋचेयुरथकक्षेयुःकृकणेयुश्चवीर्यवान् १० स्थंडिलेयुर्वनेयुश्चजलेयुश्चमहायशाः तेजेयुर्बलवान्धीमान्सत्येयुश्चेंद्र
विक्रमः ११ धर्मेयुःसन्नतेयुश्चदशमोदेवविक्रमः अनाधृष्टिरभूत्तेषांविद्वान्भुवितथैकराट् ऋचेयुरथविक्रांतोदेवाना
मिववासवः १२ अनाधृष्टिसुतस्त्वासीद्राजसूयाश्वमेधकृत् मतिनारइतिख्यातोराजापरमधार्मिकः १३ मतिनारसुताराजं
श्चत्वारोऽमितविक्रमाः तंसुर्महानतिरथोद्रुह्युश्चाप्रतिमद्युतिः १४ तेषांतंसुर्महावीर्यःपौरवंवंशमुद्वहन् आजहारयशो
दीप्तंजिगायचवसुंधरां १५ ईलिनंतुसुतंतंसुर्जनयामासवीर्यवान् सोपिकृत्स्नामिमांभूमिंविजिग्येजयतांवरः रथंतर्यांसु
तान्पंचपंचभूतोपमांस्ततः ईलिनोजनयामासदुष्यंतप्रमुखान्नृपान् १७ दुष्यंतंशूरभीमौचप्रवसुंवसुमेवच तेषांज्येष्ठोभवद्रा
जादुष्यंतोजनमेजय १८ दुष्यंताद्भरतोजज्ञेविद्वांछाकुंतलोनृपः तस्माद्भरतवंशस्यविप्रतस्थेमहद्यशः १९ भरतस्ति
सृषुस्त्रीषुनवपुत्रानजीजनत् नाभ्यनंदंततान्राजानानुरूपाममेत्युत २० ततस्तान्मातरःक्रुद्धाःपुत्रान्निन्युर्यमक्षयं तत
स्तस्यनरेंद्रस्यवितथंपुत्रजन्मतत् २२ ॥

आ·
१८४

२४ सवैः सवसंज्ञैर्यज्ञैः २५ ३३ जनरूपिणयोरित्यक्षराधिक्यमार्षं ३४ आर्क्षे आर्क्षपुत्रे ३५ ॥

ततोमहद्भिःक्रतुभिरीजानोभरतस्तदा लेभेपुत्रंभरद्वाजाद्भुमन्युंनामभारत २२ ततःपुत्रिणमात्मानंज्ञात्वापौरवनंदनः भुमन्युं
भरतश्रेष्ठयौवराज्येभ्यषेचयत् २३ ततोदिविरथोनामभुमन्योरभवत्सुतः सुहोत्रश्चसुहोताचसुहविःसुयजुस्तथा पुष्करिण्यामृ
चीकश्चभुमन्योरभवन्सुताः २४ तेषांज्येष्ठःसुहोत्रस्तुराज्यमापमहीक्षितां राजसूयाश्वमेधाद्यैःसोयजद्बहुभिःसवैः २५ सु
होत्रःपृथिवींकृत्स्नांबुभुजेसागरांबरां पूर्णांहस्तिगवाश्वस्यबहुरत्नसमाकुलां २६ ममज्जेवमहीतस्यभूरिभारावपी
डिता हस्त्यश्वरथसंपूर्णामनुष्यकलिलाभृशं २७ सुहोत्रेराजनितदाधर्मतःशासतिप्रजाः चैत्ययूपांकिताचासीद्भू
मिःशतसहस्रशः प्रवृद्धजनसस्याचसर्वदैवव्यरोचत २८ ऐक्ष्वाकीजनयामाससुहोत्रात्पृथिवीपतेः अजमीढंसुमीढं
चपुरुमीढंचभारत ३० अजमीढोवरस्तेषांतस्मिन्वंशःप्रतिष्ठितः षट्पुत्रान्सोप्यजनयत्तिसृषुस्त्रीषुभारत ३१ ऋक्षं
धूमिन्यथोनीलीदुष्यंतपरमेष्ठिनौ केशिन्यजनयज्जह्नुंसुतौचजनरूपिणौ ३२ तथेमेसर्वपांचालादुःषंतपरमेष्ठिनोः अन्व
याःकुशिकाराजन्जह्नोरमिततेजसः ३३ जनरूपिणयोर्ज्येष्ठमृक्षमाहुर्जनाधिपं ऋक्षात्संवरणोजज्ञेराजन्वंशकरः
सुतः ३४ आर्क्षेसंवरणेराजन्प्रशासतिवसुंधरां संक्षयःसुमहानासीत्प्रजानामितिनःश्रुतं ३५ ॥ ॥ ॥

क्षयैः नाशहेतुभिः क्षुन्मृत्युप्रभृतिभिः ३६ ३७ अभ्ययात्तं संवरणं स एनं संवरणमेव ३८ पलायत अडभावआर्षः ३९ ४० ४१ ४२ ४३ ४४

म ४

अशीर्यत ततो राष्ट्रं क्षयैर्नानाविधैस्तदा क्षुन्मृत्युभ्यामनावृष्ट्या व्याधिभिश्च समाहतं ३६ अभ्यघ्नन्भारतांश्चैव सपत्नानां
बलानि च चालयन्वसुधां चेमां बलेन चतुरंगिणा ३७ अभ्ययात्तं च पांचाल्यो विजित्य तरसा महीं अक्षौहिणीभिर्द
शभिः स एनं समरेऽजयत् ३८ ततः सदारः सामात्यः सपुत्रः ससुहृज्जनः राजा संवरणस्तस्मात्पलायत महाभयात् ३९
सिंधोर्नदस्य महतो निकुंजे न्यवसत्तदा नदीविषयपर्यंते पर्वतस्य समीपतः तत्रावसन्बहून्कालान्भारता दुर्गमाश्रिताः
तेषां निवसतां तत्र सहस्रं परिवत्सरान् ४१ अथाभ्यगच्छद्भरतान्वसिष्ठो भगवानृषिः तमागतं प्रयत्नेन प्रत्युद्गम्याभि
वाद्य च ४२ अर्घ्यमभ्याहरंस्तस्मै ते सर्वे भारतास्तदा निवेद्य सर्वमृषये सत्कारेण सुवर्चसे ४३ तमासने चोपविष्टं
राजा वव्रे स्वयं तदा पुरोहितो भवान्नोऽस्तु राज्याय प्रयतेमहि ४४ ॥

श्रा
१८५

ओमित्यंगीकारो। विषाणवत्तगिरिश्रृंगवत्तच्छ्रेष्ठभूतं ७५ बलिभृतः करदान् ७६ ७७ सौरीसूर्यकन्या ७८ ७९ ५० अभिष्यंतस्यवाविक्षिदितिसंज्ञांतरं

ओमित्येवंवसिष्ठोपिभारतान्प्रत्यपद्यत अभ्यषिंचत्साम्राज्येसर्वक्षत्रस्यपौरवं विषाणभूतंसर्वस्यांपृथिव्यामितिनःश्रुतं
७५ भरताध्यासितंपूर्वंसोध्यतिष्ठत्पुरोत्तमं पुनर्बलिभृतश्चैवचक्रेसर्वमहीक्षितः ७६ ततःसपृथिवींप्राप्यपुनरीजेमहाबलः
आजमीढोमहायज्ञैर्बहुभिर्भूरिदक्षिणैः ७७ ततःसंवरणात्सौरीतपतीसुषुवेकुरुं राजत्वेतंप्रजाःसर्वाधर्मज्ञइतिवव्रिरे ७८
तस्यनाम्नाभिविख्यातंपृथिव्यांकुरुजांगलं कुरुक्षेत्रंसतपसापुण्यंचक्रेमहातपाः ७९ अश्ववंतमभिष्यंतंतथाचैत्ररथं
मुनिं जनमेजयंचविख्यातंपुत्रांश्चास्यानुशुश्रुमः पंचैतान्वाहिनीपुत्रान्व्यजायतमनस्विनी ५० अविक्षितःपरिक्षित्तुशब
लाश्वश्चवीर्यवान् आदिराजोविराजश्चशाल्मलिश्चमहाबलः उच्चैःश्रवाभंगकारोजितारिश्चाष्टमःस्मृतः ५१ एतेषा
मन्ववायेतुख्यातास्तेकर्मजैर्गुणैः जनमेजयादयःसप्ततथैवान्येमहारथाः ५२ परीक्षितोऽभवन्पुत्राःसर्वेधर्मार्थकोविदाः कक्ष
सेनोग्रसेनौतुचित्रसेनश्चवीर्यवान् ५३ इंद्रसेनःसुषेणश्चभीमसेनश्चनामतः जनमेजयस्यतनयाभुविख्यातामहाबलाः ५४
धृतराष्ट्रःप्रथमजःपांडुर्बाह्लीकएवच निषधश्चमहातेजास्तथाजांबूनदोबली ५५ ॥

५१ ५२ ५३ ५४ ५५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम०
१८५

५६ ५७ सुतानां कुंडिकादीनां मध्ये सुतानां हुरिति पाठे तु सुतानां तेभ्यो वा न्वीक्ष्य मारणान्मथितानां हुरिति व्याख्येयं ५८ ५९ अध्यायः स्फुत इति ७ ॥

कुंडोदरः पदातिश्च वसातिश्चाष्टमः स्मृतः सर्वे धर्मार्थकुशलाः सर्वभूतहिते रताः ५६ धृतराष्ट्रोऽपराज्ञासीत्तस्य पुत्रोऽपि कुंडिकः
हस्ती वितर्कः क्राथश्च कुंडिनश्चापि पंचमः ५७ हविःश्रवास्तथेंद्राभः सुमन्युश्चापराजितः धार्त्तराष्ट्रसुतानां तु त्रीनेतान्प्रथितान्भु
वि ५८ प्रतीपे धर्मनेत्रं च सुनेत्रं चापि भारत प्रतीपः प्रथितस्तेषां बभूवाप्रतिमो भुवि ५९ प्रतीपस्य त्रयः पुत्रा जज्ञिरे भरतर्षभ देवा
पिः शांतनुश्चैव वाह्लीकश्च महारथः ६० देवापिश्च प्रवव्राज तेषां धर्महितेप्सया शांतनुश्च महीं लेभे वाह्लीकश्च महारथः ६१ भरत
स्यान्वये जाताः सत्ववंतो नराधिपाः देवर्षिकल्पा नृपते बहवो राजसत्तमाः ६२ एवंविधाश्चाप्यपरे देवकल्पा महारथाः जाता मनोरन्व
वाये ऐलवंशविवर्द्धनाः ६३ इत्यादिपर्वणि पुरुवंशानुकीर्त्तनं जनमेजय उ च श्रुतस्त्वत्तो मया ब्रह्मन्पूर्वेषां संभवो महान् उदारा
श्चापि वंशेऽस्मिन्राजानो मे परिश्रुताः १ किं तु लध्वर्थसंयुक्तं प्रियाख्यानं न मामति प्रीणात्यतो भवान्भूयो विस्तरेणाब्रवीतु मे २ एता
मेव कथां दिव्यामाप्रजापतितो मनोः तेषामाजननं पुण्यं कस्य न प्रीतिमावहेत् ३ सद्धर्मगुणमाहात्म्यैरभिवर्द्धितमुत्तमं विष्टभ्य
लोकांस्त्रीनेषां यशः स्फीतमवस्थितं ४ ॥

श्रीरामो जयति ॥ ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

गुरुणः द्रात्स्वात्स्य प्रभावो देवतादिवशित्वं वीर्यं शारीरं बलं तेजः मानसं सामर्थ्यं धैर्यादि सत्वं अदीनत्वं उत्साहः प्रयत्नमानता ५ ६ अदितेर्दक्षो अजायत दक्षाददितिः परिनिष्क्रमयोः स्थिति क्रमयोरन्यमाह दक्षाददितिरिति आद्यकल्पहरिवंशे वक्ष्यते अदितेर्दक्षो दक्षाद्दितिरिति अनयोस्त्वपक्षयोः कल्पभेदेन व्यवस्था ७ ८ ९ १० ११

गुरुप्रभाववीर्योजःसत्वोत्साहवतामहं नत्पणिकर्षां स्प एवत्रमन्तास्वादसंमितां ५ वैशंपायन उवाच अथाऽऽराजन्पुरा सम्यग्द्वैपायनात् श्रुतं प्रोच्यमानं मया कृत्स्नं स्ववंशजननं शुभं ६ दक्षाददितिरदितेर्विवस्वान् विवस्वतो मनुर्मनोरिडा इलायाः पुरूरवाः पुरूरवस आयुरायुषो नहुषो नहुषाद्ययातिर्ययातेर्द्वे भार्ये बभूवतुः ७ उशनसो दुहिता देवयानी वृषपर्वणश्च दुहिता शर्मिष्ठा नाम अत्रानुवंशश्लोको भवति यदुं च तुर्वसुं चैव देवयानी व्यजायत द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ९ तत्र यदोर्यादवाः पूरोः पौरवाः पूरोस्तु भार्या कौशल्या नाम तस्यामस्य जज्ञे जनमेजयो नाम यस्त्रीनश्वमेधानाजहार विश्वजिता चेष्ट्वा वनं विवेश ११ जनमेजयः खल्वनंतां नाम उपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान् यः प्राचीं दिशं जिगाय यावत्सूर्योदयात् ततस्तं प्राचिन्वंतं १२ ॥ ॥ ॥ ॥

मे १

यावत्सूर्योदयाचलपर्यन्तं एकेनैवाह्ना इति तु भावः १२ १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सङ्कमनान्त १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४

प्राचिन्वान्खल्वश्मकीमुपयेमेयादवीन्तस्यामस्यजज्ञेसंयातिः १३ संयातिःखल्वदृषद्वतोदुहितरंवराङ्गीनामेतस्यामस्यजज्ञेअहंयातिः
१४ अहंयातिःखलुकृतवीर्यदुहितरमुपयेमेभानुमतीनामतस्यामस्यजज्ञेसार्वभौमः १५ सार्वभौमःखल्वुजित्वाजहारकैकेयीसुनंदां
नामतामुपयेमेतस्यामस्यजज्ञेजयत्सेनोनाम १६ जयत्सेनःखल्वुवैदर्भीमुपयेमेसुश्रवानामतस्यामस्यजज्ञेअवाचीनः १७ अवाची
नोपिवैदर्भीमपरामेवोपयेमेमर्यादांनाम तस्यामस्यजज्ञेअरिहः १८ अरिहःखल्वाङ्गीमुपयेमेतस्यामस्यजज्ञेमहाभौमः १९ महाभौमः
खलुप्रासेनजितीमुपयेमेसुयज्ञोनाम तस्यामस्यजज्ञेअयुतनायीयःपुरुषाधानामयुतमानयत् तेनास्यायुतनायित्वं २० अयुतनायीख
लुपृथुश्रवसोदुहितरमुपयेमेकामांनाम तस्यामस्यजज्ञेअक्रोधनः २१ खलुकालिंगीकरभांनामोपयेमेतस्यामस्यजज्ञेदेवातिथिः २२
देवातिथिःखल्वुवैदेहीमुपयेमेमर्यादांनामतस्यामस्यजज्ञेऽरिहोनाम २३ अरिहःखल्वाङ्गीमुपयेमेसुदेवानामतस्यांपुत्रमजीजनदृक्षं
२४

श्रीरामोजयति ॥ ॥ ॥ ॥ २४ २७ ॥ २७ ७ ७ ॥ ॥ ॥

श्रा· ऋक्षः खलु तक्षकदुहितरमुपयेमे ज्वालां नाम तस्यां पुत्रं मतिनारं नामोत्पादयामास २५ मतिनारः खलु सरस्वत्यां गुणसमन्वितं द्वादशवार्षिकं सत्रमाहरत
१८७ समाप्ते च सत्रे सरस्वत्यभिगम्य तं भर्तारं वरयामास तस्यां पुत्रमजीजनत्तंसुं नाम २६ अत्रानुवंशश्लोको भवति तंसुं सरस्वती पुत्रं मतिनाराद्जीजनत् ईलिनं जनया
मास कालिंग्यां तं सुरात्मजं २७ ईलिनस्तु रथंतर्यां दुष्यंतादीन्पंच पुत्रानजीजनत् २८ दुष्यंतः खलु विश्वामित्रदुहितरं शकुंतलां नामोपयेमे तस्या
मस्यां जज्ञे भरतः २८ अत्रानुवंशश्लोकौ भवतः माता भस्त्रा पितुः पुत्रो येन जातः स एव सः भरस्व पुत्रं दुष्यंत मावमंस्थाः शकुंतलां ३० रेतोधाः पुत्र उन्नय
ति नरदेव यमक्षयात् त्वं चास्य धाता गर्भस्य सत्यमाह शकुंतला ३१ ततोस्य भरतत्वं भरतः खलु काशेयामुपयेमे सार्वसेनीं सुनंदां नाम तस्यामस्य जज्ञे भुम
न्युः ३२ भुमन्युः खलु दाशार्हीमुपयेमे विजयां नाम तस्यामस्य जज्ञे सुहोत्रः ३३ सुहोत्रः खल्विक्ष्वाकुकन्यामुपयेमे सुवर्णां नाम तस्यामस्य जज्ञे ह
स्ती य इदं हास्तिनपुरं स्थापयामास एतदस्य हास्तिनपुरत्वं ३४ हस्ती खलु त्रैगर्तीमुपयेमे यशोधरां नाम तस्यामस्य जज्ञे विकुंठनो नाम ३५ वि
कुंठनः खलु दाशार्हीमुपयेमे सुदेवां नाम तस्यामस्य जज्ञे अजमीढो नाम ३६ अजमीढस्य चतुर्विंशतिपुत्रशतं बभूव कैकेय्यां गांधार्यां विशालाया
मृक्षायां चेति पृथक् पृथग्वंशधरा नृपतयः तत्र वंशकरः संवरणः ३७ संवरणः खलु वैवस्वतीं तपतीं नामोपयेमे तस्यामस्य जज्ञे कुरुः ३८
कुरुः खलु शौदेहीमुपयेमे शुभांगीं नाम तस्यामस्य जज्ञे विदूरः ३९ विदूरस्तु माधवीमुपयेमे संप्रियां नाम तस्यामस्य जज्ञे अनश्वा नाम ४०
अनश्वा खलु मागधीमुपयेमे अमृतां नाम तस्यामस्य जज्ञे परीक्षित् ४१ परीक्षित् खलु बाहुदामुपयेमे सुयशां नाम तस्यामस्य जज्ञे भीमसेनः
४२ भीमसेनः खलु कैकेयामुपयेमे कुमारीं नाम तस्यामस्य जज्ञे प्रतिश्रवा नाम ४३ प्रतिश्रवसः प्रतीपः प्रती ॥ ॥ ॥ राम०
१८७

यः खलु शैब्यामुपयेमे सुनंदां नाम तस्यां पुत्रानुत्पादयामास देवापिं शांतनुं बाह्लिकं चेति ४४ देवापिः खलु बाल एवारण्यं विवेश। शांतनुस्तु महीपा
लो बभूव ४५ अत्रानुवंशश्लोको भवति। यं यं कराभ्यां स्पृशति जीर्णं स सुखमश्नुते पुनर्युवा च भवति तस्मात्तं शांतनुं विदुः इति तदस्य शांतनु
त्वं ४६ शांतनुः खलु गंगां भागीरथीमुपयेमे तस्यामस्य जज्ञे देवव्रतो नाम यमाहुर्भीष्ममिति ४७ भीष्मः खलु पितुः प्रियचिकीर्षया सत्यवतीं
मातरमुदावाहयत यामाहुर्गंधकालीमिति ४८ तस्यां पूर्वं कानीनो गर्भः पराशराद्द्वैपायनोऽभवत् तस्यामेव शांतनोरन्यौ द्वौ पुत्रौ बभूवतुः ४९
विचित्रवीर्यश्चित्रांगदश्च तयोरप्राप्तयौवन एव चित्रांगदो गंधर्वेणाहतः विचित्रवीर्यस्तु राजासीत् ५० विचित्रवीर्यः खलु कौशल्यात्मजे द्वे अंबि
कांबालिके काशिराजदुहितरावुपयेमे ५१ विचित्रवीर्यस्त्वनपत्य एव विदेहत्वं प्राप्तः ततः सत्यवत्यचिंतयत् मा दौःषंतो वंश उच्छेदं व्रजेदिति
५२ सा द्वैपायनमृषिं मनसाचिंतयामास स तस्याः पुरतः स्थितः किं करवाणीति ५३ सा तमुवाच भ्राता तवानपत्य एव स्वर्यातो विचित्रवीर्यः सा
ध्वपत्यं तस्योत्पादयेति ५४ स तथेत्युक्त्वा त्रीन्पुत्रानुत्पादयामास धृतराष्ट्रं पांडुं विदुरं चेति ५५ तत्र धृतराष्ट्रस्य राज्ञः पुत्रशतं बभूव गांधार्यां वर
दानाद्द्वैपायनस्य तेषां धृतराष्ट्रस्य पुत्राणां चत्वारः प्रधाना बभूवुः दुर्योधनो दुःशासनो विकर्णश्चित्रसेनश्चेति पांडोस्तु द्वे भार्ये बभूवतुः कुंती
पृथानाम माद्री चेत्युभे स्त्रीरत्ने अथ पांडुर्मृगयां चरन्मैथुनगतमृषिं मृगरूपेण मृग्या वर्तमानं तथैवाहृतमनासीदितकामरसमप्राप्तं च वाणेना
जघान ५६ स वाणाविद्ध उवाच पांडुं चरता धर्ममिमं येन न त्वयाभिज्ञेन कामरसस्याहमनवाप्तकामरसो निहतस्तस्मात्त्वमप्येतामवस्थामासाद्यान
वाप्तकामरसः पंचत्वमासास्यसि क्षिप्रमेवेति स विवर्णरूपस्तथा पांडुः शापं परिहरमाणो नोपासर्पत भार्यां वाक्यं चोवाच ५७ स्वं चापत्यादिदं प्राप्त

५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२

वान्नहे अगोमिचनानयस्य स्सलोकाः संतीति सात्वंमदर्थेपुत्रानुत्पादयेतिकुंतीमुवाचसातयोक्तापुत्रानुत्पादयामास धर्मादिभ्य इति
रंमाहृतान्दीमसेनंशक्राद्दर्जुनमिति ५८ तांप्रहृष्टःपांडुरुवाच इयंतेसपत्न्यनपत्यासाध्वस्यामपत्यमुत्पादयतामिति एवमस्त्विति कुंती
तांविद्यांमाद्र्याःप्रायच्छत ५९ माद्र्यामश्विभ्यांनकुलसहदेवावुत्पादितौ ६० मांद्रीखल्वलंकृतांदृष्ट्वापांडुर्भावंचक्रेसतांस्पृष्ट्वैवविदेह
त्वंप्राप्तः ६१ तत्रैनंचिताग्निस्थंमाद्रीसमन्वारुरोह उवाचकुंतीयमयोरप्रमत्तायार्ययाभवितव्यमिति ६२ ॥ ॥ ॥ ॥ ॥

६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४

ततस्ते पांडवाः कुंत्या सहिता हास्तिनपुरमानीयतापसैर्भीष्मस्य विदुरस्य च निवेदिताः सर्ववर्णानां च निवेद्यांतर्हितास्तापसा बभूवुः प्रे
क्षमाणानां तेषां ६३ तच्च वाक्यं पुष्पकृतं भगवतामंतरिक्षात्पुष्पवृष्टिः पपात देवदुंदुभयश्च प्रणेदुः ६४ प्रतिगृहीताश्च पांडवाः पि
तुर्निधनमावेदयंतस्तस्यौर्ध्वदैहिकं न्यायतश्च कृतवंतस्तत्र निवसतः पांडवान्बाल्यात्प्रभृति दुर्योधनो नामर्षयत ६५ पापाचारो राक्षसी
बुद्धिमाश्रितोऽनेकैरुपायैरुद्धर्तुं च व्यवसितो भावित्वाच्चार्थस्य न शकितास्ते समुद्धर्तुं ६६ ततश्च धृतराष्ट्रेण व्याजेन वारणावतमनुप्रेषि
तागमनमरोचयत ६७ तत्रापि जतुगृहे दग्धुं समारब्धा न शकिता विदुरमंत्रितेनेति ६८ तस्माच्च हिडिंबमंतरा हत्वा एकचक्रां गताः
६९ तस्यामप्येकचक्रायां बकं नाम राक्षसं हत्वा पांचालनगरमधिगताः ७० तत्र द्रौपदीं भार्यामविंदन्स्वविषयं चाभिजग्मुः ७१
कुशलिनः पुत्रांश्चोत्पादयामासुः प्रतिविंध्यं युधिष्ठिरः सुतसोमं वृकोदरः श्रुतकीर्त्तिमर्जुनः शतानीकं नकुलः श्रुतकर्माणं सहदेव इति
७२ युधिष्ठिरस्तु गोवासनस्य शैब्यस्य देविकां नाम कन्यां स्वयंवरे लेभे तस्यां पुत्रं जनयामास यौधेयं नाम ७३ भीमसेनोपि काश्यां बलंध
रां नामोपयेमे वीर्यशुल्कां तस्यां पुत्रं सर्वगं नामोत्पादयामास ७४ ॥ ॥

श्रा॰
१८९

अर्जुनःखल्वपिद्वारवतींगत्वाभगिनींवासुदेवस्यसुभद्रांभद्रभाषिणींभार्यामुदावहत् स्वविषयंचाभ्यागम्यकुशलीतस्यांपुत्रमभिमन्युंनामातीवगु
णसंपन्नंदयितंवासुदेवस्याजनयत् ७५ नकुलस्तुचैद्यांकरेणुमतींनामभार्यामुदावहत्तस्यांपुत्रंनिरमित्रंनामाजनयत् ७६ सहदेवोपि
माद्रीमेवस्वयंवरेविजयांनामोपयेमेमद्रराजस्यद्युतिमतोदुहितरंतस्यांपुत्रमजनयत्सुहोत्रंनाम ७७ भीमसेनस्तुपूर्वमेवहिडिंबायांराक्षसं
घटोत्कचंपुत्रमुत्पादयामास ७८ इत्येतएकादशपांडवानांपुत्रास्तेषांवंशकरोभिमन्युः ७९ सविराटस्यदुहितरमुपयेमेउत्तरांनाम त
स्यामस्यपरासुर्गर्भोभवत्तमुत्संगेनप्रतिजग्राहद्रष्टापातियोगात् पुरुषोत्तमस्यवासुदेवस्यषाण्मासिकंगर्भमहमेनंजीवयिष्यामीति ८०
सभगवतावासुदेवेनासंजातवलवीर्यपराक्रमोकालजातोस्त्राग्निनादग्धस्तेजसास्वेनसंजीवितः जीवयित्वाचैनमुवाचपरिक्षीणेकुले
जातोभवत्वयंपरिक्षिन्नामेति ८१ परीक्षितखलुमाद्रवतींनामोपयेमेतस्मात्तस्यांभवान्जनमेजयः ८२ भवतोवपुष्टमायांद्वौपुत्रौज
ज्ञातेशतानीकःशंकुकर्णश्चशतानीकस्यवैदेह्यांपुत्रउत्पन्नोश्वमेधदत्तइति ८३ एषपूरोर्वंशःपांडवानांचकीर्तितोधन्यःसुराणः
परमपवित्रःसततंश्रोतव्योब्राह्मणैर्नियमवद्भिर्नितरांक्षत्रियैःस्वधर्मनिरतैःप्रजापालनतत्परैः वैश्यैरपिचश्रोतव्योधिगमस्थानपापक्षू
द्रैरपित्रिवर्णशुश्रूषुभिःश्रद्दधानैरिति ८४ इतिहासमिमंपुराणमशेषतःश्रावयिष्यंतियेनराः श्रोष्यंतिवानियतात्मानोविमत्सरा मैत्रा
वेदपरास्तेपिस्वर्गजितःपुण्यलोकाभवंति सततंदेवब्राह्मणमनुष्याणांमान्याःसंपूज्याश्च ८५ ॥ ॥ ॥

राम॰
१८९

८६ ८७ अध्यायः। भीष्मोत्पत्तिंवक्तुंतत्पितुःशंतनोरुत्पत्तिमाहइक्ष्वाकुवंशेति १ २ ३ ४ ५ अपध्यातःशप्तः ६

परंह्यीदंभारतंभगवताव्यासेनप्रोक्तंपावनंयेब्राह्मणादयोवर्णाः श्रद्धानाअमत्सराभैत्रावेदसंपन्नाः श्रोष्यंतितेपिस्वर्गजितः
सुकृतिनोऽशोच्याःकृताकृतेभवंति ८६ भवतिचात्रश्लोकः इदंहिवेदैःसमितंपवित्रमपिचोत्तमं धन्यंयशस्यमायुष्यंश्रो
तव्यंनियतात्मभिः ८७ इत्यादिपर्वणिपुरुवंशानुकीर्त्तनं वैशंपायनउ च इक्ष्वाकुवंशप्रभवोराजासीत्पृथिवीपतिः म
हाभिषइतिख्यातःसत्यवाक्सत्यविक्रमः १ सोश्वमेधसहस्रेणराजसूयशतेनच तोषयामासदेवेशंस्वर्गंलेभेततःप्रभुः २
ततःकदाचिद्ब्रह्माणमुपासांचक्रिरेसुराः तत्रराजर्षयोह्यासन्सचराजामहाभिषः ३ अथगंगासरिच्छ्रेष्ठासमुपाययौपिता
महं तस्यावासःसमुद्धूतमारुतेनशशिप्रभं ४ ततोभवन्सुरगणाःसहसावाङ्मुखास्तदा महाभिषस्तुराजर्षिरशंकोदृष्टवा
न्नदीं ५ सोपध्यातोभगवताब्रह्मणातुमहाभिषः उक्तश्चजातोमर्त्येषुपुनर्लोकानवाप्स्यसि ६ ॥ ७ ॥

श्रा: १९०

७ ८ विध्वस्तवपुषः दिवश्च्युतत्वात् ९ ११ अनभिसृताः अतिक्रांतवंतः वक्ष्यमाणेनतद्धेनुहरणेन १२ सजउत्पादय १३ १४ १५ १६ १७

सचिंतयित्वान्नृपतिर्नृपानन्यांस्तपोधनान् प्रतीपंरोचयामासपितरंभूरितेजसं ७ महाभिषंतुतंदृष्ट्वानदीधैर्याच्च्युतंनृपं तमेवमं
नसाध्यायंत्युपावर्त्तसरिद्वरा ८ साचविध्वस्तवपुषः कश्मलाभिहतान्नृप ददर्शपथिगच्छंतीवसून्देवान्दिवौकसः ९ तथारू
पांश्चतान्दृष्ट्वापप्रच्छसरितांवरा किमिदंनष्टरूपाः स्थकच्चित्क्षेमंदिवौकसां १० तामूचुर्वसवोदेवाः शप्ताः स्मोवैमहानदि अ
ल्पेपराधेसंरंभाद्वसिष्ठेनमहात्मना ११ विमूढाहिवयंसर्वेप्रछन्नमृषिसत्तमं संध्यांवसिष्ठमासीनंतमत्यभिसृताः पुरा ते
नकोपाद्वयंशप्तायोनौसंभवेतिह १२ नतच्छक्यंनिवर्त्तयितुंयदुक्तंब्रह्मवादिना त्वमस्मान्मानुषीभूत्वासृजपुत्रान्वसून्भुवि
१३ नमानुषीणांजठरंप्रविशेमवयंशुभे इत्युक्तातैस्तथेत्युक्त्वाब्रवीदिदं १४ गंगो च मर्त्येषुपुरुषश्रेष्ठः कोवःकर्त्ता
भविष्यति १५ वसवऊचुः प्रतीपस्यसुतोराजाशांतनुर्लोकविश्रुतः भवितामानुषेलोकेसनःकर्त्ताभविष्यति १६ गंगो
च ममाप्येवंमतंदेवायथामांवदथानघाः प्रियंतस्यकरिष्यामियुष्माकंचैतदीप्सितं १७ ॥ ॥ ॥ ॥ ॥

राम० १९०

नचिरकालंशीघ्रंनः अस्माकं १८ १९ तुरीयार्द्धम् अष्टमांसंएवमष्टभिरष्टमांशैरेकोगौर्भवितायोमुख्योऽपराधी २० २१ २२ अध्यायः ततः ६

वसवऊचुः जातान्कुमारान्स्वानप्सुप्रक्षेप्तुंवैत्वमर्हसि यथानचिरकालंनोनिष्कृतिःस्यात्त्रिलोकगे १८ गंगोवाच एवमेतत्क
रिष्यामिपुत्रस्तस्यविधीयतां नास्यमोघःसंगमःस्यात्पुत्रहेतोर्मयासह १९ वसवऊचुः तुरीयार्द्धंप्रदास्यामोवीर्यस्यैकैकशोवयं तेनवी
र्येणपुत्रस्तेभविताऽनवचेष्टितः २० नसंपत्स्यतिमर्त्येषुपुनस्तस्यतुसंततिः तस्मादपुत्रःपुत्रस्तेभविष्यतिसवीर्यवान् २१ एवंतेसम
यंकृत्वागंगायांवसवःसह जग्मुःसंहृष्टमनसोयथासंकल्पमंजसा २२ इत्यादिपर्वणिमहाभिषोपाख्याने वैशंपायनउ च ततःप्रती
योराजासीत्सर्वभूतहितःसदानिषसादसमावर्द्धीगंगाद्वारगतोजपन् १ तस्यरूपगुणोपेतागंगास्त्रीरूपधारिणी उत्तीर्यसलिलात्त
स्मात्लोभनीयतमाकृतिः २ अधीयानस्यराजर्षेर्दिव्यरूपामनस्विनी दक्षिणंशालसंकाशमूरुंभेजेशुभानना ३ प्रतीपस्तुमही
पालस्तामुवाचयशस्विनीं करोमिकिंतेकल्याणिप्रियंयत्तेभिकांक्षितं ४ स्त्र्यु च त्वामहंकामयेराजन्भजमानांभजस्वमां त्या
गःकामवतीनांहिस्त्रीणांसद्भिर्विगर्हितः ५ प्रतीपउ च नाहंपरस्त्रियंकामाद्गच्छेयंवरवर्णिनि नचासवर्णांकल्याणिधर्म्यमेतद्वि
मेव्रतं ६ स्त्र्यु च नाश्रेयस्यस्मिनागम्यानवक्तव्याचकर्हिचित् भजंतींभजमांराजन्दिव्यांकन्यांवरस्त्रियं ७ प्रतीपउ च त्वयाति
वृत्तमेतत्तुयन्मांचोदयसिप्रियं अन्यथाप्रतिपन्नोमांनाशयेद्धर्मविप्लवः ८ प्राप्यदक्षिणमूरुंमेत्वमाश्लिष्टावरांगने अपत्यानांस्नुषा
णांचभीरुविद्ध्येतदासनं ९ ॥ ७

दिव्यांदिविभवां ७ त्वयाहेतुभूतयातिक्रान्तोनिरस्ते ८ आश्लिष्टासंगता ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

आ॰
९९

१३ समयेननियमेननमीमांसेतनविचारयेत १४ १७ शांतनुशब्दव्युत्पत्तिमाह शांतस्योपरतस्यवंशस्यसंतानोविस्तारइतिशांततनुः तकारलोपेनशांतनुरितिनाम १८

सव्योरुः कामिनीभोग्यस्त्वयासचविवर्जितः तस्मादहंनाचरिष्येत्वयिकामंवरांगने १० स्नुषामेभवसुश्रोणिपुत्रार्थेत्वांवृणोम्यहं स्नुषाप
क्षंहिवामोरुत्वमागम्यसमाश्रिता ११ स्त्र्यु॰ च एवमप्यस्तुधर्मज्ञसंयुज्येयंसुतेनते त्वद्भक्त्यानुभजिष्यामिप्रख्यातंभारतंकुलं १२ पृथिव्यांपा
र्थिवायेचतेषांयूयंपरायणं गुणानहिमयाशक्यावक्तुंवर्षशतैरपि १३ कुलस्ययेवःप्रथितास्तत्साधुत्वमनुत्तमं समयेनेहधर्मज्ञआचरेयंचय
द्विभो तत्सर्वमेवपुत्रस्तेनमीमांसेतकर्हिचित १४ एवंवसंतीपुत्रेतेवर्द्धयिष्याम्यहंरतिं पुत्रैःपुण्यैःप्रियैःस्वर्गंप्राप्स्यतितेसुतः १५ वैशंपाय
न उ॰ च तथेत्युक्त्वातुसाराजंस्तत्रैवांतरधीयत पुत्रजन्मप्रतीक्षन्वैसराजातदधारयत १६ एतस्मिन्नेवकालेतुप्रतीपः क्षत्रियर्षभः तपस्तेपेस
तस्यार्थेसभार्यःकुरुनंदन १७ तयोःसमभवत्पुत्रोवृद्धयोःसमहाभिषः शांतस्यजज्ञेसंतानस्तस्मादासीत्सशांतनुः १८ संस्मरंश्चाक्षयाँल्लोका
न्विजितान्स्वेनकर्मणा पुण्यकर्मकृदेवासीच्छांतनुःकुरुसत्तमः १९ प्रतीपःशांतनुंपुत्रंयौवनस्थंततोन्वशात् पुरामांस्त्रीसमभ्यागाच्छांतनो
भूतयेतव त्वामावृजेद्यदिरहःसापुत्रवरवर्णिनी कामयानाभिरूपाढ्यादिव्यास्त्रीपुत्रकाम्यया २१ सात्वयानानुयोक्तव्याकासिकस्यासिचांग
ने यच्चकुर्यात्तत्कार्यंसाप्रष्टव्यात्वयानघ मन्नियोगाद्भजंतींतांभजेथाइत्युवाचतं २२ वैशंपायन उ॰ च एवंसंदिश्यतनयंप्रतीपःशांतनुंतदा
स्वेचराज्येभिषिच्यैनंवनंराजाविवेशह २३ सराजाशांतनुर्धीमान्देवराजसमद्युतिः बभूवमृगयाशीलःसततंवनगोचरः २४ ॥ ॥ ॥

संस्मरन्नितिव्यवहितमपिज्ञानबलेनजानातीत्यर्थः १९ २० २१ २२ नानुयोक्तव्यानप्रष्टव्या २३ २४ ॥ ॥ ॥ ॥

राम॰
९९

३१ अध्यायः अनिंदितागंगा १ राज्ञःशंतनोः २ ८ भाग्योपनतकामस्यशुभादृष्टेनप्राप्ताभिलषितस्य ९ हावः शृंगारजोभावःतासांसुकुमारतैते १० ११ १२ ॥

समगान्महिषांश्चैवविनिघ्नन् राजसत्तमः गंगामनुचचारैकःसिद्धचारणसेवितां २५ सकदाचिन्महाराजददर्शपरमांस्त्रियं जाज्वल्यमानां
वपुषासाक्षाच्छ्रियमिवापरां २६ सर्वानवद्यांसुदतींदिव्याभरणभूषितां सूक्ष्मांवरधरामेकांपद्मोदरसमप्रभां २७ तांदृष्ट्वाहृष्टरोमाभूद्विस्मितो
रूपसंपदा पिवन्निवचनेत्राभ्यांनातृप्यतनराधिपः २८ साचदृष्ट्वैवराजानंविचरन्तंमहाद्युतिं स्नेहादागतसौहार्दानातृप्यतविलासिनी २९
तामुवाचततोराजासांत्वयन्श्लक्ष्णयागिरा देवीवादानवीवात्वंगंधर्वीयदिवाप्सराः ३० यक्षीवापन्नगीवापिमानुषीवासुमध्यमे याचेत्वांसुर
गर्भाभेभार्यामेभवशोभने ३१ इत्यादिपर्वणि वैशंपायनउ च एतच्छ्रुत्वावचोराज्ञःसस्मितंमृदुवल्गुच वसूनांसमयंस्मृत्वाप्यभ्यागच्छ
दनिंदिता १ उवाचचैवराज्ञःसाह्लादयंतीमनोगिरा भविष्यामिमहीपालमहिषीतेवशानुगा २ यत्तुकुर्यामहंराजञ्छुभंवायदिवाशुभं नतद्वा
रयितव्यास्मिनवक्तव्यातथाप्रियं ३ एवंहिवर्तमानेहंत्वयिवत्स्यामिपार्थिव वारिताविप्रियंचोक्तात्यजेयंत्वामसंशयं ४ तथेतिराज्ञासातूक्तात
दाभरतसत्तम प्रहर्षमतुलंलेभेप्राप्यतंपार्थिवोत्तमं ५ आसाद्यशांतनुस्तांचबुभुजेकामतोवशी नप्रष्टव्येतिमन्वानोनसतांकिंचिदूचिवान् ६
सतस्याःशीलवृत्तेनरूपौदार्यगुणेनच उपचारेणचरहस्तुतोषजगतीपतिः ७ दिव्यरूपाहिसादेवीगंगात्रिपथगामिनी मानुषंविग्रहंकृत्वा
श्रीमंतेवरवर्णिनी ८ भाग्योपनतकामस्यभार्याचोपनताभवत् शंतनोर्नृपसिंहस्यदेवराजसमद्युतेः ९ संभोगस्नेहचातुर्यैर्हावलास्यमनो
हरैः राजानंरमयामासयथारमेततथैवसः १० सराजारतिसक्तत्वादुत्तमस्त्रीगुणैर्हृतः संवत्सरानृतून्मासान्नबुबुधेनवहून्गतान् ११ ॥। ॥।

पाठांतरे अमराणामपि वर्णिनि चित्रकरान् १२ प्रीणामि मानुषे देहवियोजनेन प्रीणयामि त्वां देवनाम्रूपं स्रोतसि प्रवाहे १३ १५ तेलया १६ १९ धात्री गर्भधारिणी २०
तज्जननीहेतोः ब्रह्मसभायां तिष्ठतां वा अभिलाषात् २१ संश्रुतोऽङ्गीकृतः २२ आपवस्य वसिष्ठस्य २३ एष पुत्रः मे मया अष्टानां वसूनां सन्निधौ कृत स्वदर्थे संप्रार्थितः किंभूतः

रममाणास्तया सार्द्धं यथाकामं नरेश्वरः अष्टावजनयत्पुत्रांस्तस्याममरसंनिभान् ११ जातं जातं च सा पुत्रं क्षिपत्यम्भसि भारत प्रीणाम्यहं त्वामित्युक्त्वा
गंगास्रोतस्यमज्जयत् १२ तस्य तन्न प्रियं राज्ञः शांतनोरभवत्तदा न च तां किंचनोवाच त्यागाद्भीतो महीपतिः १४ अथैनामष्टमे पुत्रे जाते प्रहसतीमि
व उवाच राजा दुःखार्त्तः परीप्सन्पुत्रमात्मनः १५ मा वधीः कस्य कासीति किं हिनस्सि सुतानिति पुत्रघ्नि सुमहत्पापं संप्राप्तं ते सुगर्हितं १६ स्त्र्युवाच
पुत्रकाम न ते हन्मि पुत्रं पुत्रवतां वर जीर्णस्तु मम वासोऽयं यथा स समयः कृतः १७ अहं गंगा जह्नुसुता महर्षिगणसेविता देवकार्यार्थसिद्ध्यर्थमु
षिताहं त्वया सह १८ इमेऽष्टौ वसवो देवा महाभागा महौजसः वसिष्ठशापदोषेण मानुषत्वमुपागताः १९ तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते
मद्विधा मानुषी धात्री लोके नास्तीह काचन २० तस्मात्तज्जननीहेतोर्मानुषत्वमुपागता जनयित्वा वसूनष्टौ जिता लोकास्त्वयाक्षयाः २१
देवानां समयस्त्वेष वसूनां संश्रुतो मया जातं जातं मोक्षयिष्ये जन्मतो मानुषादिति २२ तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः स्वस्ति तेऽस्तु ग
मिष्यामि पुत्रं पाहि महाव्रतं २३ एष पर्यायवासो मे वसूनां संनिधौ कृतः मत्प्रसूतं विजानीहि गंगादत्तमिमं सुतं २४ इत्यादिपर्वणि भीष्मो
त्पत्तिः शांतनुवाच आपवो नाम को न्वेष वसूनां किं च दुष्कृतं यस्याभिशापात्ते सर्वे मानुषीं योनिमागताः १ ॥ ॥ ॥ छ

अष्टम्यांशमदानात्तेषां वासः स्यान्तं सर्वेषां मे शेषघटितो यं मया त्वदर्थं प्रार्थितस्त्वर्थः २४ आदिपर्वणि भीष्मोत्पत्तिः शांतनु १ ॥ ॥ ॥ ॥ ॥ ॥

७ गांप्रजातानंदिनींजनितवती ८ १४ एवंपृथुसंज्ञायवसवेवालधिःपुष्ठे १५ वसुनंदिनीवसोःप्रिया १६ २२ ॥

अनेनचकुमारेणात्तयादत्तेनकिंकृतं यस्यचैवकृतेनायंमानुषेषुनिवत्स्यति २ ईशावैसर्वलोकस्यवसवस्तेचवैकथं मानुषेषूदपद्यंततन्ममाचक्ष्व
जाह्नवि ३ वैशंपायनउ च एवमुक्तातदागंगाराजानमिदमब्रवीत भर्त्तारंजाह्नवीदेवीशांतनुंपुरुषर्षभं ४ गंगो च यंलेभेवरुणःपुत्रं
पुराभारतसत्तम वसिष्ठनामासमुनिःख्यातआपवइत्युत ५ तस्याश्रमपदंपुण्यंमृगपक्षिसमन्वितं मेरोःपार्श्वेनगेंद्रस्यसर्वर्त्तुकुसुमावृतं ६
सवारुणिस्तपस्तेपेतस्मिन्भारतसत्तम वनेपुण्यकृतांश्रेष्ठःस्वादुमूलफलोदके ७ दक्षस्यदुहितायातुसुरभीत्यभिशब्दिता गांप्रजातातुसादेवी
कश्यपाद्भरतर्षभ ८ अनुग्रहार्थंजगतःसर्वकामदुहांवरा तांलेभेगांतुधर्मात्माहोमधेनुंसवारुणिः ९ सातस्मिंस्तापसारण्येवसंतीमुनिसेवि
ते चचारपुण्येरम्येचगौरपेतभयातदा १० अथतद्वनमाजग्मुःकदाचिद्भरतर्षभ पृथ्वाद्यावसवःसर्वेदेवादेवर्षिसेवितं ११ तेसदारावनंतं
च्चव्यचरंतसमंततः रेमिरेरमणीयेषुपर्वतेषुवनेषुच १२ तत्रैकस्याथभार्यातुवसोर्वासवविक्रम संचरंतीवनेतस्मिन्गांददर्शसुमध्यमा १३ नंदि
नीनामराजेंद्रसर्वकामधुगुत्तमा साविस्मयसमाविष्टाशीलद्रविणसंपदा १४ द्यवेवैदर्शयामासतांगांगोवृषभेक्षणा आपीनांचसुदोग्ध्री
चसुवालधिखुरांशुभा उपपन्नांगुणैःसर्वैःशीलेनानुत्तमेनच १५ एवंगुणसमायुक्तांवसवेवसुनंदिनी दर्शयामासराजेंद्रपुरापौरवनंदन
१६ द्यौस्तदातांतुदृष्ट्वैवगांगजेंद्रविक्रमः उवाचराजंस्तांदेवींतस्यारूपगुणान्वदन् १७ एषागौरुत्तमादेवीवारुणेरसितेक्षणा ऋषेस्तस्य
वरारोहेयस्येदंवनमुत्तमं १८ अस्याःक्षीरंपिबेन्मर्त्यःस्वादुयोवैसुमध्यमे दशवर्षसहस्राणिसजीवेत्स्थिरयौवनः १९ ॥ ॥।॥

श्रा.
१६३

२६ प्रयातःवसिष्ठशापरूपोमृगुःपतनंवानतर्कितःरागांधत्वात् २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८

एतच्छ्रुत्वातुसादेवीन्नपोत्तममुवाचमा तमुवाचानवद्यांगीमर्त्तारंदीप्ततेजसं २० अस्तिमेमानुषेलोकेनरदेवात्मजासखी नाम्नाजितवतीनाम
रूपयौवनशालिनी २१ उशीनरस्यराजर्षेःसत्यसंधस्यधीमतः दुहिताप्रथितालोकेमानुषेरूपसंपदा २२ तस्याहेतोर्महाभागसवत्सांगांममेप्सि
तां आनयस्वामरश्रेष्ठत्वरितंपुण्यवर्द्धन २३ यावदस्याःपयःपीत्वासासखीमममानद मानुषेषुभवत्वेकाजरारोगविवर्जिता ॥ २४ एतन्म
ममहाभागकर्त्तुमर्हसिनिंदित प्रियंप्रियतरंह्यस्मान्नास्तिमेन्यत्कथंचन २५ एतच्छ्रुत्वावचस्तस्यादेव्याःप्रियचिकीर्षया पृथ्वाद्यैर्भ्रातृभिः
सार्द्धंद्यौस्तदातांजहारगां २६ तयाकमलपत्राक्ष्यानियुक्तोद्यौस्तदानृप ऋषेस्तस्यतपस्तीव्रंनशशाकनिरीक्षितुं हृतागौःसातदातेन
नुप्रपातस्तुनतर्कितः २७ अथाश्रमपदंप्राप्तःफलान्यादायवारुणिः नचापश्यत्सगांतत्रसवत्सांकाननोत्तमे २८ ततःसमृगयामास
वनेतस्मिंस्तपोधन नाध्यगमच्चमृगयंस्तांगांमुनिरुदारधीः २९ ज्ञात्वातथापनीतांतांवसुभिर्दिव्यदर्शनः ययौक्रोधवशंसद्यःशशापच
वसूंस्तदा ३० यस्मान्मेवसवोजह्रुर्गांवैदोग्ध्रींसुवालधिं तस्माद्वैजनिष्यंतिमानुषेषुनसंशयः ३१ एवंशशापभगवान्वसूंस्तान्भरतर्षभ
वशंक्रोधस्यसंप्राप्तआपवोमुनिसत्तमः ३२ शप्त्वाचतान्महाभागस्तपस्येवमनोदधे एवंसशप्तवानाजन्वसून्स्तैतपोधनः महा
प्रभावोब्रह्मर्षिर्देवान्क्रोधसमन्वितः ३३ अथाश्रमपदंप्राप्तास्तेवैभूयोमहात्मनः शप्ताःस्मइतिजानंतोऋषिंतमुपचक्रमुः ३४

राम
१६३

३८ नप्रजापतिश्चात्मनः प्रजेछांनकरिष्यतिष्यनिकाजंतोयं ३९ तच्चहेतुःपितुःरिति ४० ४८ अध्यायःसराजा १ २ ॥

दंस २

प्रसादयंतत्तमृषिंवसवःपार्थिवर्षभ लेभिरेनचतस्मात्तेप्रसादंमृषिसत्तमात् आपवानुरुषव्याघ्रसर्वधर्मविशारदात् ३६ उवाचचसधर्मात्माशाप्ता
पूर्येधरादयः अनुसंवत्सरेवैशायमोक्षमवाप्स्यथ ३७ अयंतुयत्कृतेयूयंमयाशाप्ताःसवत्स्यति द्यौस्तदामानुषेलोकेदीर्घकालंस्वकर्मणा ३८ नाहृतंत
न्चिकीर्षामिक्रुद्धोयुष्मानद्ब्रुवं नप्रजास्यतिचाप्येषमानुषेषुमहामनाः ३९ भविष्यतिचधर्मात्मासर्वशास्त्रविशारदः पितुःप्रियहितेयुक्तःस्त्रीभोगाव
र्जयिष्यति ४० एवमुक्त्वावसून्सर्वान्सजगामममहानृषिः ततोमामुपजग्मुस्तेसमेतावसवस्तदा ४१ अयाचंतचमांराजन्वरंतच्चमयाकृतंजाता
न्जातान्प्रक्षिपास्मान्स्वयंगंगेत्वमंभसि ४२ एवंतेषामहंसम्यकृशप्तानांराजसत्तम मोक्षार्थंमानुषाल्लोकाद्यथावत्कृतवत्यहं ४३ अयंशा
पाद्दषेस्तस्यएकएवनृपोत्तम द्यौराजन्मानुषेलोकेचिरंवत्स्यतिभारत ४४ वैशंपायनउवाच एतदाख्यायसादेवीतत्रैवांतरधीयत आदायच
कुमारंतंजगामाथयथेप्सिते ४५ सतुदेवव्रतोनामगांगेयइतिचाभवत् द्वनामाशांतनोःपुत्रःशांतनोरधिकोगुणैः ४६ शांतनुश्चापिशो
कार्तोजगामस्वपुरंततः तस्याहंकीर्त्तयिष्यामिशांतनोरधिकान्गुणान् ४७ महाभाग्यंचनृपतेर्भारतस्यमहात्मनः यस्येतिहासोद्युतिमान्म
हाभारतमुच्यते इत्यादिपर्वणिआपवेसमाप्तं वैशंपायनउवाच सराजाशांतनुर्धीमान्देवराजर्षिसत्कृतः धर्मात्मासर्वलोकेषुसत्यवागितिवि
श्रुतः १ दमोदानंक्षमाबुद्धिर्ह्रीर्धृतिस्तेजउत्तमं नित्यान्यासन्महासत्वेशांतनौपुरुषर्षभे २

श्री
९६

१० पुटभेदेनपत्तनंपुटभेदनमित्यमरः ११ दानंवहिर्वेदिःधर्मःसदाचारःतपःजपोपवासादियोगःआत्मानुसंधानंएतच्चतुष्टयात् १२ १७ ब्रह्मधर्मोत्तरेराज्ये

एवंसगुणसंपन्नोधर्मार्थकुशलोन्टप आसीद्भरतवंशस्यगोप्तासर्वजनस्यच ३ कंबुग्रीवःपृथुव्यंसोमत्तवारणविक्रमः अन्वितः
परिपूर्णार्थैःसर्वैर्न्टपतिलक्षणैः ४ तस्यकीर्तिमतोवृत्तमवेक्ष्यसततंनराः धर्मएवपरःकामादर्थाच्चेतिव्यवस्थिताः ५ एतान्यासन्म
हासत्वशांतनोःपुरुषर्षभे नवासयसदृशःकश्चिद्धर्मतःपार्थिवोभवत् ६ वर्त्तमानंहिधर्मेषुसर्वधर्मभृतांवरं तंमहीपामहीपालंराजरा
ज्येभ्यषेचयन् ७ वीतशोकभयाबाधाःसुखस्वप्नविबोधनाः पतिंभारतगोप्तारंसमपद्यंतभूमिपाः ८ शांतनुप्रमुखैर्गुप्तेलोकेन्टपति
भिस्तदा नियमात्सर्ववर्णानांधर्मोत्तरमवर्त्तत ९ ब्रह्मपर्यचरत्क्षत्रंविशःक्षत्रमनुव्रताः ब्रह्मक्षत्रानुरक्ताश्चशूद्राःपर्यचरन्
विशः १० सहास्तिनपुरेरम्येकुरूणांपुटभेदने वसन्सागरपर्यंतामन्वशासद्वसुंधरां ११ सदेवराजसदृशोधर्मज्ञःसत्यवागृजुः दान
धर्मतपोयोगाच्छ्रियापरमयायुतः १२ अरागद्वेषसंयुक्तःसोमवत्प्रियदर्शनः तेजसासूर्यकल्पोभूद्वायुवेगसमोजवे अंतकप्रतिमःकोपे
क्षमत्वेपृथिवीसमः १३ वधःपशुवराहाणांतथैवमृगपक्षिणां शांतनोःपृथिवीपालेनावर्त्ततयान्टप १४ ब्रह्मधर्मोत्तरेराज्येशांत
यो २ नुर्विनयात्मवान् समंशशासभूतानिकामरागविवर्जितः १५ १५ ॥

हिंसाधर्मप्रधानेविनयात्मवान्विनयवान्आत्मवान्जितात्मा १५ ॥ ७ ॥ ७ ॥ ॥ ॥

राम०
९६

१७ वाकसत्यंश्रिताभवत् १८ षोडशादीनांसंकलनेषट्त्रिंशसमाःवर्षाणि २९ ३० अस्त्रेषुमंत्रमयेषुशस्त्रेषुपार्थिवेषुधनुर्बाणगदादिपृथिवीविकारेषुशस्त्रेषु

वापुस्तपा ३

देवर्षिपितृयज्ञार्थमारभ्यंततदाक्रियाः नचाधर्मेणकेषांचित्प्राणिनामभवद्वधः १६ असुखानामनाथानांतिर्यग्योनिषुवर्त्ततां सएवराजा
सर्वेषांभूतानामभवत्पिता १७ तस्मिन्कुरुपतिश्रेष्टेराजराजेश्वरेसति श्रितावागभवत्सत्यंदानधर्माश्रितंमनः १८ ससमाःषोडशाष्टौ
चचतस्रोष्टौतथापराः रतिमप्राप्नुवंस्त्रीषुबभूववनगोचरः १९ तथारूपस्तथाचारस्तथावृत्तस्तथाश्रुतः गांगेयस्तस्यपुत्रोभून्नाम्नादेवव्रतोवसुः
२० सर्वास्त्रेषुसनिष्णातःपार्थिवेष्वितरेषुच महाबलोमहासत्वोमहावीर्योमहारथः २१ सकदाचिन्मृगंविध्वागंगामनुसरन्नदी
भागीरथीमल्पजलांशांतनुर्दृष्टवान्नृपः २२ तांदृष्ट्वाचिंतयामासशांतनुःपुरुषर्षभः स्यंदतेकिंन्वियंनाद्यसरिच्छ्रेष्ठायथापुरा २३
ततोनिमित्तमन्विच्छन्ददर्शसमहामनाः कुमारंरूपसंपन्नंबृहंतंचारुदर्शनं २४ दिव्यमस्त्रंविकुर्वाणंयथादेवंपुरंदरं कृत्स्नांगंगांसमावृत्य
तंशरैस्तीक्ष्णैरवस्थितं २५ तांशरैरावृतांदृष्ट्वानदींगंगांतदंतिके अभवद्विस्मितोराजादृष्ट्वाकर्मातिमानुषं २६ जातमात्रंपुरादृष्ट्वा
तंपुत्रंशांतनुस्तदा नोपलेभेस्मृतिंधीमानभिज्ञातुंतमात्मजं २७ सतुतंपितरंदृष्ट्वामोहयामाससमायया संमोह्यतुततःक्षिप्रंतत्रैवांतरधीयत
२८ तदद्भुतंततोदृष्ट्वातत्रराजासशांतनुः शंकमानःसुतंगंगामब्रवीद्दर्शयेतिह २९ दर्शयामासतंगंगाबिभ्रतीरूपमुत्तमं ॥

२१ शरसंधानेनगंगाप्रवाहस्यतिरोधानात् अल्पजलां २२ स्यंदतेप्रस्रवति २३ २४ २५ २६ अभिज्ञातुंपरिचेतुं २७ २८ २९ ॥

आ:
१९१

३३ अधिजगेअधीतवान् ३४ उशनाशुक्रः ३५ अंगिरसःपुत्रोबृहस्पतिः ३६ ३९ सौम्यानेसःआत्मानं ४० ४४

गृहीत्वादक्षिणेपाणौतंकुमारमलंकृतं ३० अलंकृतामाभरणैर्विरजोंबरसंवृतां दृष्टपूर्वामपिसतींनाभ्यजानात्सशांतनुः ३१ गंगोवा
च यंपुत्रमष्टमंराजंस्त्वंपुरामय्यविंदथाः सचायंपुरुषव्याघ्रसर्वास्त्रविदनुत्तमः ३२ गृहाणेमंमहाराजमयासंवर्द्धितंसुतं आदायपुरुष
व्याघ्रनयस्वैनंगृहंविभो ३३ वेदानधिजगेसांगान्वसिष्ठादेषवीर्यवान् कृतास्त्रःपरमेष्वासोदेवराजसमोयुधि ३४ सुराणांसंमतोनित्यम
सुराणांचभारत उशनावेदयच्छास्त्रमयंतद्वेदसर्वशः ३५ तथैवांगिरसःपुत्रःसुरासुरनमस्कृतः यद्वेदशास्त्रंतच्चापिकृत्स्नमस्मिन्प्रतिष्ठितं
तवपुत्रेमहाबाहौसांगोपांगमहात्मनि ३६ ऋषिःपरैरनाधृष्योजामदग्न्यःप्रतापवान् यदस्त्रंवेदरामश्चतदेतस्मिन्प्रतिष्ठितं ३७ महेष्वा
समिमंराजन्राजधर्मार्थकोविदं मयादत्तंनिजंपुत्रंवीरंवीरगृहंनय ३८ वैशंपायनउ च तयैवंसमनुज्ञातःपुत्रमादायशांतनुःभ्राजमा
नंयथादित्यमाययौस्वपुरंप्रति ३९ पौरवस्वपुरींगत्वापुरंदरपुरोपमां सर्वकामसमृद्धार्थंमेनेसात्मानमात्मना ४० पौरवेषुततःपुत्रंयौवरा
ज्येभ्यषेचयत् ४ पौरवांछांतनोःपुत्रःपितरंचमहायशाः राष्ट्रंचरंजयामासवृत्तेनभरतर्षभ ४२ सतथासहपुत्रेणरममाणोमहीपतिः व
र्तयामासवर्षाणिचत्वार्यमितविक्रमः ४३ सकदाचिद्वनंयातोयमुनामभितोनदीं महीपतिरनिर्देश्यमाजिघ्रद्गंधमुत्तमं ४४ ४४

राम:
१९५

दाशानांधीवराणां ७५ ७६ तरिंनावं ७७ ५१ अवसेयंविनिश्चित्यपरिदेयंनवेति ५३ ५४ शरीरजेनकामेना ५५ ५६ ५७ ५८ ५९ ६०

तस्याप्रभवमन्विछन्विचचारसमंततः सददर्शतदाकन्यांदाशानांदेवरूपिणीं ७५ तामपृछत्सदृष्ट्वैवकन्याममसितलोचनां कस्यात्वमसिकावा
सिकिंचभीरुचिकीर्षसि ७६ साब्रवीद्दाशकन्यास्मिधर्मार्थंवाहयेतरिं पितुर्नियोगाद्भद्रंतेदाशराज्ञोमहात्मनः ७७ रूपमाधुर्यगंधैस्तांसंयु
क्तांदेवरूपिणीं समीक्ष्यराजादाशेयींकामयामासशंतनुः ७८ सगत्वापितरंतस्यावरयामासतांतदा पर्यपृछत्ततस्तस्याःपितरंसोत्मकार
णात् ७९ सचसत्कृत्यप्रत्युवाचेदंदाशराजोमहीपतिं जातमात्रैवमेदेयावरायवरवर्णिनी हृदिकामस्तुतेकश्चित्तंनिबोधजनेश्वरः ५० यदी
मांधर्मपत्नींत्वमितःप्रार्थयसेनघ सत्यवागसिसत्येनसमयंकुरुमेततः ५१ समयेनप्रदद्यांतेकन्यामहमिमांनृप नहिमेत्वत्समःकश्चिद्व
रोजातुभविष्यति ५२ शांतनु च श्रुत्वातंवरंदाशव्यवसेयमहंतव दातव्यंचेत्प्रदास्यामिनत्वदेयंकथंचन ५३ दाशउ च अस्यां
जायेतयःपुत्रःसराजापृथिवीपते त्वदूर्ध्वमभिषेक्तव्योनान्यःकश्चनपार्थिवः ५४ वैशंपायनउ च नाकामयततंदातुंवरंदाशायशांत
नुःशरीरजेनतीव्रेणदह्यमानोपिभारत ५५ सचिंतयन्नेवतदादाशकन्यांमहीपतिः प्रत्ययाद्धास्तिनपुरंकामोपहतचेतनः ५६ ततः
कदाचिच्छोचमानंशांतनुंध्यानमास्थितं पुत्रोदेवव्रतोभ्येत्यपितरंवाक्यमब्रवीत् ५७ सर्वतोभवतःक्षेमंविधेयाःसर्वपार्थिवाः तत्किमर्थमि
हाभीक्ष्णंपरिशोचसिदुःखितः ५८ ध्यायन्निवचमांराजन्नाभिभाषसिकिंचन एवमुक्तःसपुत्रेणशांतनुःप्रत्यभाषत ५९ ॥

॥ ॥ ॥ ॥

श्रीकृष्णोजयति ॥ ॥॥ ॥

६३ विद्यासंतानं शिष्यप्रशिष्यद्वारा ६२ ६४ एवमिति एतत्संजातसंश्रेयःसाधनत्वं मनुष्येषु तत्स्मात्सुप्रजासु परत्वादिषु च प्रसिद्धं नाप्यत्र सल्लोकोस्तीति तत्सर्वे यशो वो विदुः तस्मात्तु
पुत्रो मातरं स्वसारं चाधिरोहतीति मंत्रलिंगात् । अपत्यं श्रेयःसाधनं इति यत्तत्र मम संशयो नास्ति तस्मात्त्वं दयालुत्वात् यथा कथंचित्प्रजोत्पादनं कर्त्तुमर्हसीति भावः त्रयी वेदः सोयं

असंशयं ध्यानपरो यथावत्सत्यपराक्रम अपत्यं न त्वमेवैकः काले महति भारत ६० शास्त्रतः शास्त्रनित्यश्च पौरुषे पर्यवस्थितः अनित्यतां च लो
कानामनुशोचामि पुत्रक कथंचित्तव गांगेय विपत्तौ नास्ति नः कुलं ६१ असंशयं त्वमेवैकः शतादपि वरः सुतः न चाप्यहं वृथा भूयो दारान्कर्तुमिहोत्स
हे ६२ संतानस्याविनाशाय कामये भद्रमस्तु ते अनपत्यतैकपुत्रत्वमित्याहुर्धर्मवादिनः ६३ अग्निहोत्रं त्रयी विद्यासंतानमपि चाक्षयं सर्वाण्ये
तान्यपत्यस्य कलां नार्हन्ति षोडशीं ६४ एवमेतन्मनुष्येषु तच्च सर्वप्रजास्विति यदपत्यं महाप्राज्ञ तत्र मे नास्ति संशयः ६५ एषा त्रयी पुराणानां
देवतानां च शाश्वती त्वं च शूरः सदामर्षी शस्त्रनित्यश्च भारत नान्यत्र युद्धात्तस्मात्ते निधनं विद्यते क्वचित् ६६ सोस्मि संशयमापन्नस्त्वयि शांते क
थं भवेत् इति ते कारणं तात दुःखस्योक्तमशेषतः ६७ वैशंपायन उ च ततस्तत्कारणं राज्ञो ज्ञात्वा सर्वमशेषतः देवव्रतो महाबुद्धिः प्रययाचान्व
चिंतयत ६८ अभ्यगच्छत्तदैवाशु वृद्धामात्यं पितुर्हितं तमपृच्छत्तदाभ्येत्य पितुस्तच्छोककारणं ६९ ॥

लोकः पुत्रेण जय्यो नान्येन कर्मणा । कर्मणा पितृलोको विद्यया देवलोकः इत्यादिः पुराणानां मूलभूता । देवतानां प्रमाणभूता ६५ ६६ ६७ ६८ ६९ ॥ ॥

वरंवरश्माय ७८ ७९ ७९ ८० ८१ ८२ ८३ ८४

तस्मै स कुलमुख्याय पावनारिप्रच्छते वरं शशंस कन्यां तामुद्दिश्य भरतर्षभ ७० ततो देवव्रतो वृद्धैः क्षत्रियैः सहितस्तदा अभिगम्य दाशराजं कन्यां वव्रे पि
तुः स्वयं ७१ स दाशः प्रतिजग्राह विधिवत्प्रतिपूज्य च अब्रवीच्चैनमासीनं राजसंसदि भारत ७२ त्वमेव नाथः पर्याप्तः शांतनोर्भरतर्षभ पुत्रः शस्त्र
भृतां श्रेष्ठः किं तु वक्ष्यामि ते वचः ७३ को हि संबंधकं श्लाघ्यमीप्सितं यौनमीदृशं अतिक्रामन्न तप्येत साक्षादपि शतक्रतुः ७४ अपत्यं चैतदा
र्यस्य यो युष्माकं समो गुणैः यस्य शुक्रात्सत्यवती संभूता वरवर्णिनी ७५ तेन मे बहुशस्तात पिता ते परिकीर्तितः अर्हः सत्यवतीं वोढुं धर्मज्ञः स नरा
धिपः ७६ असितो ह्यपि देवर्षिः प्रत्याख्यातः पुरा मया सत्यवत्या भृशं चार्थी स आसीदृषिसत्तमः ७७ कन्यापितृत्वात्किंचित्तु वक्ष्यामि त्वां
नराधिप बलवत्सपत्नतामत्र दोषं पश्यामि केवलं ७८ यस्य हि त्वं सपत्नः स्या गंधर्वस्यासुरस्य वा न स जातु चिरं जीवेत्त्वयि क्रुद्धे परंतप ७९ ए
तावानत्र दोषो हि नान्यः कश्चन पार्थिव एतज्जानीहि भद्रं ते दानादाने परंतप ८० वैशंपायन उ च एवमुक्तस्तु गांगेयस्तद्युक्तं प्रत्यभाषत शृण्व
तां भूमिपालानां पितुरर्थाय भारत ८१ इदं मे व्रतमादत्स्व सत्यं सत्यवतां वर नैव जातो न वाजात ईदृशं वक्तुमुत्सहेत् ८२ एवमेतत्करिष्यामि यथा त्व
मनुभाषसे योस्यां जनिष्यते पुत्रः स नो राजा भविष्यति ८३ इत्युक्तः पुनरेवाथ तं दाशः प्रत्यभाषत चिकीर्षुर्दुष्करं कर्म राज्यार्थे भरतर्षभ ८४ ॥

आ
१९७

८५ कौमारिराणांकुमारीस्नेहवता ८६ ९३ भीष्मोभयंकरकर्मकारित्वात् ९७ ९८ अध्यायः ९८ ॥

त्वमेवनाथःसंप्राप्तःशांतनोरमितद्युते कन्यायाश्चैवधर्मात्मन्प्रभुर्दानायचेश्वरः ८५ इदंतुवचनंसौम्यकार्यंचैवनिबोधमे कौमारिकाणांशी
लेनवक्ष्याम्यहमरिंदम ८६ यस्त्वयासत्यवत्यर्थेसत्यधर्मपरायण राजमध्येप्रतिज्ञातमनुरूपंतवैवतत् ८७ नान्यथातन्महाबाहोसंशयोत्रनक
श्चन तवापत्यंभवेद्यत्तुतत्रनःसंशयोमहान् ८८ वैशंपायनउ च तस्यैतन्मतमाज्ञायसत्यधर्मपरायणः प्रत्यजानात्तदाराजन्पितुःप्रियचिकीर्ष
या ८९ गांगेयउ च दाशराजनिबोधेदंवचनंमेनृपोत्तम शृण्वतांभूमिपालानांयद्ब्रवीमिपितुःकृते ९० राज्यंतावत्पूर्वमेवमयात्यक्तंनराधिपाः
अपत्यहेतोरपिचकरिष्येषविनिश्चयं ९१ अद्यप्रभृतिमेदाशब्रह्मचर्यंभविष्यति अपुत्रस्यापिमेलोकाभविष्यंत्यक्षयादिवि ९२ वैशंपायनउ च
तस्यतद्वचनंश्रुत्वासंप्रहृष्टतनूरुहः ददानीत्येवतंदाशोधर्मात्माप्रत्यभाषत ९३ ततोंतरिक्षेप्सरसोदेवाःसर्षिगणास्तदा अभ्यवर्षंतकुसुमैर्भीष्मोय
मितिचाब्रुवन् ९४ ततःसपितुरर्थायतामुवाचयशस्विनीं अधिरोहरथंमातर्गच्छावःस्वगृहानिति ९५ वैशंपायनउ च एवमुक्त्वातुभीष्मस्तांर
थमारोप्यभामिनीं आगम्यहास्तिनपुरंशांतनोःसन्यवेदयत् ९६ तस्यतद्दुष्करंकर्मप्रशशंसुर्नराधिपाः समेताश्चपृथक्चैवभीष्मोयमितिचाब्रुवन्
९७ तच्छ्रुत्वादुष्करंकर्मकृतंभीष्मेणशांतनुः स्वच्छंदमरणंतुष्टोददौतस्मैमहात्मने ९८ इत्यादिपर्वणिसत्यवतीलाभे ९८ ॥ ॥ ॥

श्रीरामोजयति ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम:
१९७

ततइति १२३ कालधर्ममेत्तु ४ ६ तुल्यनामाचित्रांगदस्नामा ७ ८ ९ अंतायकृत्वाअंतेकर्तु १० ११ १४ अध्यायः १९ ॥

वैशंपायनउवाच ततोविवाहेनिर्वृत्तेसराजाशंतनुर्नृपः तांकन्यांरूपसंपन्नांस्वगृहेसंन्यवेशयत् १ ततःशांतनवोधीमान्सत्यवत्यामजायत वीर
श्चित्रांगदोनामवीर्यवान्पुरुषेश्वरः २ अथापरंमहेष्वासंसत्यवत्यांसुतंप्रभुः विचित्रवीर्यंराजानंजनयामासवीर्यवान् ३ अप्राप्तवतितस्मिं
श्चयौवनंपुरुषर्षभे सराजाशंतनुर्धीमान्कालधर्ममुपेयिवान् ४ स्वर्गतेशंतनौभीष्मश्चित्रांगदमरिंदमं स्थापयामाससराज्येसत्यवत्यामतेस्थितः
५ सतुचित्रांगदःशौर्यात्सर्वांश्चिक्षेपपार्थिवान् मनुष्यंनहिमेनेसकंचित्सदृशमात्मनः ६ तंक्षिपंतंसुरांश्चैवमनुष्यानसुरांस्तथा गंधर्वराजोब
लवांस्तुल्यनामाभ्ययात्तदा ७ तेनास्यसुमहद्युद्धंकुरुक्षेत्रेबभूवह तयोर्बलवतोस्तत्रगंधर्वकुरुमुख्ययोः नद्यास्तीरेसरस्वत्याःसमास्तिस्त्रोभ
वद्रणः ८ तस्मिन्विमर्देतुमुलेशस्त्रवर्षसमाकुले मायाधिकोवधीद्वीरंगंधर्वःकुरुसत्तमं ९ सहत्वातुनरश्रेष्ठंचित्रांगदमरिंदमं अंताय
कृत्वागंधर्वोदिवमाचक्रमेततः १० तस्मिन्पुरुषशार्दूलेनिहतेभूरितेजसि भीष्मःशांतनवोराजाप्रेतकार्याण्यकारयत् ११ विचित्रवी
र्यंचतदाबालमप्राप्तयौवनं कुरुराज्येमहाबाहुरभ्यषिंचदनंतरं १२ विचित्रवीर्यःसतदाभीष्मस्यवचनेस्थितः अन्वशासन्महाराज
पितृपैतामहंपदं १३ सधर्मशास्त्रकुशलंभीष्मंशांतनवंनृपः पूजयामासधर्मेणसचैनंप्रत्यपालयत् १४ इत्यादिपर्वणिविचित्रे १९

श्रीरामोजयति ॥ ॥ ३ ॥ छ ॥ छ ॥ छ ॥ ॥ छ

हृते ७ आहूयेति ब्राह्मः ८ मिथुनेन गृहीतेनेति आर्षः वित्तेनेत्यासुरः बलेनेति राक्षसः अनुमान्येति गांधर्वः ९ प्रमत्तेति पैशाचः स्वयमन्ये इति प्राजापत्यः आर्षं विधिं य

वैशंपायन उवाच हते चित्रांगदे भीष्मो बाले भ्रातरि कौरव पालयामास तद्राज्यं सत्यवत्या मते स्थितः १ संप्राप्तयौवनं दृष्ट्वा भ्रातरं धीमतां वरः भीष्मो विचित्रवीर्यस्य विवाहायाकरोन्मतिं २ अथ काशिपतेर्भीष्मः कन्यास्तिस्रोप्सरोपमाः शुश्राव सहिता राजन्वृण्वाना वै स्वयंवरं ३ ततः स रथिनां श्रेष्ठो रथेनैकेन शत्रुजित् जगामानुमते मातुः पुरीं वाराणसीं प्रभुः ४ तत्र राज्ञः समुदितान्सर्वतः समुपागतान् ददर्श कन्यास्ताश्चैव भीष्मः शंतनुनंदनः ५ कीर्त्यमानेषु राज्ञां तु तदा नामसु सर्वशः भीष्मस्तदा स्वयं कन्या वरयामास ताः प्रभुः ६ उवाच च महीपालान्राजन्जलदनिःस्वनः रथमारोप्य ताः कन्या भीष्मः प्रहरतां वरः ७ आहूय दानं कन्यानां गुणवद्भ्यः स्मृतं बुधैः अलंकृत्य यथाशक्ति प्रदाय च धनान्यपि ८ प्रयच्छंत्यपरे कन्यां मिथुनेन गवामपि वित्तेन कथितेनान्ये बलेनान्येनुमान्य च ९ प्रमत्तामुपयांत्यन्ये स्वयमन्ये च विंदते आर्षं विधिं पुरस्कृत्य दारान्विंदंति चापरे अष्टमं तमथो वित्त विवाहं कविभिर्वृतं १० स्वयंवरं तु राजन्याः प्रशंसंत्युपयांति च प्रमथ्य तु हृतामाहुर्ज्यायसीं धर्मवादिनः ११ ता इमाः पृथिवीपाला जिहीर्षामि बलादितः ते यतध्वं परं शक्त्या विजयायेतराय वा १२ स्थितोहं पृथिवीपाला युद्धाय कृतनिश्चयः एवमुक्त्वा महीपालान्काशिराजं च वीर्यवान् १३ ॥

त्तेनेन दैव उक्तः एते अष्टौ विवाहाः प्राग्व्याख्याताः १० अष्टमं राक्षसं विवाहं प्रशंसति स्वयंवरमिति ११ १२ १३ ॥ ॥ ॥ ॥ ॥

१७ प्रकीर्यद्भिर्भूषणैरुपलक्षिता। अनुसस्रुरित्यन्वयः १९ २६ अन्यानतिपुरुषान्रथचारिणः लाघवं शीघ्रं परध्वजादिछेदे रक्षणं आत्मनः शत्रवोप्यपूजयन् २७ ॥

सर्वाः कन्याः स कौरव्यो रथमारोप्य च स्वकं आमंत्र्य च स तान्प्रायाच्छीघ्रं कन्याः प्रगृह्य ताः १४ ततस्ते पार्थिवाः सर्वे समुत्पेतुरमर्षिताः संस्पृशंतः
स्वकान्वाहून्दशंतो दशनच्छदान् १५ तेषामाभरणान्याशु त्वरितानां विमुंचतां आमुंचतां च वर्माणि संभ्रमः सुमहानभूत् १६ ताराणामिव
संपातो वभूव जनमेजय भूषणानां च सर्वेषां कवचानां च सर्वशः १७ सुवर्मभिर्भूषणैश्च प्रकीर्यद्भिरितस्ततः सक्रोधामर्षजिह्मभ्रूकषायीकृत
लोचना १८ सूतोपक्लृप्तान्रुचिरान्सदश्वोरुपकल्पितान् रथानास्थाय ते वीराः सर्वप्रहरणान्विताः १९ प्रयांतमपकौरव्यमनुसस्रुरुदायुधाः
ततः समभवद्युद्धं तेषां तस्य च भारत एकस्य च बहूनां च तुमुलं लोमहर्षणं २० ते त्विषून्दशसाहस्रांस्तस्मिन्युगपदाक्षिपन् अप्राप्तांश्चैव तानाशु
भीष्मः सर्वानपातयत् अच्छिनच्छरवर्षेण महता लोमवाहिना २१ ततस्ते पार्थिवाः सर्वे सर्वतः परिवार्य तं ववृषुः शरवर्षेण वाद्रिमंबुदाः २२ स तं
वाणमयं वर्षं शरैरावार्य सर्वतः सर्वान्महीपालान्प्रत्यविध्यत्त्रिभिस्त्रिभिः २३ एकैकस्तु ततो भीष्मं राजन्विव्याध पंचभिः स च तान्प्रतिविव्या
ध द्वाभ्यां द्वाभ्यां पराक्रमन् २४ तद्युद्धमासीत्तुमुलं घोरं देवासुरोपमं पश्यतां लोकवीराणां शरशक्तिसमाकुलं २५ स धनूंषि ध्वजाग्राणि वर्मा
णि च शिरांसि च चिच्छेद समरे भीष्मः शतशोथ सहस्रशः २६ तस्यातिपुरुषानन्यांल्लाघवं रथचारिणः रक्षणं चात्मनः सर्वेप्यशत्रवोप्यपूजयन्
जयन् २७ ॥ वर्षेले ४

नरः ३

भी॰ १९९

वासितां करिणीं प्राप्तं वारणं यथा परो वनु प्राप्नोति घने भिंदन् वासितां स्त्री करिणी गोश्च नम मरः ३० ३४ वृषौ रेतः सेक कामौ गजौ गो वृषाविव वा तदा साहचर्यात् वासि

तान् विनिर्जित्य नरो सर्वशस्त्रभृतां वरः कन्याभिः सहितः प्रायाद् भारतो भारतान् प्रति २८ ततः तं पृष्ठतो राजन् शाल्वराजो महारथः अ
भ्यगच्छदमेयात्मा भीष्मं शान्तनवं रणे २९ वारणं जघने भिंदन् दन्ताभ्यामपरो यथा वासितामनुसंप्राप्तो यूथपो बलिनां वरः ३० स्त्रीकाममति
ष्ठ तिष्ठेति भीष्ममाह स पार्थिवः शाल्वराजो महाबाहुरमर्षेणाभिचोदितः ३१ ततः स पुरुषव्याघ्रो भीष्मो परबलार्दनः तद्वाक्याकुलितः
क्रोधाद्विधूमोग्निरिव ज्वलन् ३२ विततेषुधनुः पाणिर्विकुंचितललाटभृत् क्षत्रधर्मं समास्थाय व्यपेतभयसंभ्रमः ३३ निवर्तयामास र
थं शाल्वं प्रति महारथः निवर्तमानं तं दृष्ट्वा राजानः सर्व एव ते प्रेक्षकाः समपद्यन्त भीष्मशाल्वसमागमे ३४ तौ वृषाविव नर्दन्तौ बलि
नौ वासितान्तरे अन्योन्यमभिवर्तेतां बलविक्रमशालिनौ ३५ ततो भीष्मं शान्तनवं शरैः शतसहस्रशः शाल्वराजो नरश्रेष्ठः समवा
किरदाशुगैः ३६ पूर्वमभ्यर्दितं दृष्ट्वा भीष्मं शाल्वेन ते नृपाः विस्मिताः समपद्यन्त साधु साध्विति चाब्रुवन् ३७ लाघवं तस्य ते दृष्ट्वा समरे
सर्वपार्थिवाः अपूजयन्त संहृष्टा वाग्भिः शाल्वं नराधिपं ३८ क्षत्रियाणां ततो वाचः श्रुत्वा परपुरंजयः क्रुद्धः शान्तनवो भीष्मस्तिष्ठ
तिष्ठेत्यभाषत ३९ सारथिं चाब्रवीत् क्रुद्धो याहि यत्रैष पार्थिवः यावदेनं निहन्म्यद्य भुजंगमिव पक्षिराट् ४० ततोस्त्रं वारुणं सम्य
ग्योजयामास कौरवः तेनाश्वांश्चतुरो मृद्नाच्छाल्वराजस्य भूपते ४१

तां पुष्पिणीं गोरसादं तत्र रेतन्निमित्तं ३५ ३६ ३७ ३८ ३९ ४० ४१

याम॰ १९९

जीवितंप्राणमात्रावशेषितं ४७ ४८ काश्यपस्यकाशिराजस्य ४९ अनुजीः कनिष्ठाः ५० ५५ तस्यवैवाहिकस्यकर्मणः काले ५६

अस्त्रैरस्त्राणिसंवार्यशाल्वराजस्यकौरवः भीष्मोनृपतिशार्दूलंन्यवधीत्तस्यसारथिं ४२ अस्त्रेणवास्यापेंद्रेणान्यवधीत्तुरगोत्तमान् कन्याहे
तोर्नरश्रेष्ठभीष्मः शांतनवस्तदा ४३ जित्वाविसर्जयामासजीवंतंनृपसत्तमं ततः शाल्वः स्वनगरंप्रययौभरतर्षभ ४४ स्वराज्यमन्वशाच्चै
वधर्मेणनृपतिस्तदा राजानोयेचतत्रासन्स्वयंवरदिदृक्षवः स्वान्येवतेपिराष्ट्राणिजग्मुः परपुरंजयाः ४५ एवंविजित्यताः कन्याभीष्मः प्र
हरतांवरः प्रययौहास्तिनपुरंयत्रराजासकौरवः ४६ विचित्रवीर्योधर्मात्माप्रशास्तिवसुधामिमां यथापितास्यकौरव्यः शांतनुर्नृपसत्तमः
४७ सोचिरेणैवकालेनअत्यक्रामन्नराधिप वनानिसरितश्चैवशैलांश्चविविधान्द्रुमान् ४८ अक्षतः क्षपयित्वारीन्संख्येसंख्ये
यविक्रमः आनयामासकाश्यस्यसुताः सागरगासुतः ४९ स्नुषाइवसधर्मात्माभगिनीरिवचानुजाः यथादुहितरश्चैवपरिगृह्यययौ
कुरून् ५० आनिन्येसमहाबाहुर्भ्रातुः प्रियचिकीर्षया ताः सर्वगुणसंपन्नाभ्राताभ्रात्रेयवीयसे ५१ भीष्मोविचित्रवीर्यायप्रददौविक्र
माहृताः एवंधर्मेणधर्मज्ञः कृत्वाकर्मातिमानुषं भ्रातुर्विचित्रवीर्यस्यविवाहायोपचक्रमे ५२ सत्यवत्यासहमिथः कृत्वानिश्चयमात्म
वान् विवाहेकारयिष्यंतंभीष्मंकाशिपतेः सुता ज्येष्ठातासामिदंवाक्यमब्रवीद्धसतीतदा ५३ मयासौभपतिः पूर्वंमनसाभिवृतः पतिः
तेनचास्मिवृतापूर्वमेषकामश्चमेपितुः ५४ मयावरयितव्योभूच्छाल्वस्तस्मिन्स्वयंवरे एतद्विज्ञायधर्मज्ञधर्मतत्त्वंसमाचर ५५ एवमु
क्तस्तयाभीष्मः कन्ययाविप्रसंसदि चिंतामभ्यगमद्वीरोयुक्तांतस्यैवकर्मणः ५६ ॥ ॥ ॥ ॥ ॥ ॥

आ: १०० बृहत्यौ चते श्यामे च प्रौढे अप्रसूते च बृहती पुष्पवद्रक्तश्यामे इत्यन्ये ६० स्थितेनन्ततत्रैवनिष्ठावयौ ६१ ६५ अध्यायः १०० ततः ७ इतरेणा ॥

अन्यासक्तात्वियंकन्याऽऽपेक्षेत्रेमयपालिता वाचादत्तामनोदत्ताकृतमंगलकौतुका निर्दिष्टातुपरस्यैवसावर्णीपरश्चित्तिका इत्युक्त्वा
चानुमान्यैवमाप्रातरंसत्यवत्यांविनिश्चित्यसधर्मज्ञोब्राह्मणैर्वेदपारगैः अनुजज्ञेतदाज्येष्ठामम्बांकाशिपतेःसुतां ५७ अंबिका
म्बालिकेभार्येप्रादाद्भ्रात्रेयवीयसे भीष्मोविचित्रवीर्यायविधिदृष्टेनकर्मणा ५८ तयोःपाणींगृहीत्वातुरूपयौवनदर्पितः विचित्रवीर्यो
धर्मात्माकामात्मासमपद्यत ५९ तेचापिबृहतीश्यामेनीलकुंचितमूर्द्धजे रक्ततुंगनखोपेतेपीनश्रोणिपयोधरे ६० आत्मनःप्रतिरू
पोसौलब्धःपतिरितिस्थिते विचित्रवीर्यंकल्याणंपूजयामासतुःशुभे ६१ सचाश्विरूपसदृशोदेवतुल्यपराक्रमः सर्वासामेवनारी
णांचित्तप्रमथनोरहः ६२ ताभ्यांसहसमाःसप्तविहरन्पृथिवीपतिः विचित्रवीर्यस्तरुणोयक्ष्मणासमगृह्यत ६३ सुहृदांयतमानानां
नामाप्तैःसहचिकित्सकैः जगामास्तमिवादित्यःकौरव्योयमसादनं ६४ धर्मात्मासतुगांगेयश्चिन्ताशोकपरायणः प्रेतकार्याणिसर्वाणि
तस्यसम्यगकारयत ६५ राज्ञोविचित्रवीर्यस्यसत्यवत्यामतेस्थितः ऋत्विग्भिःसहितोभीष्मःसर्वैश्चकुरुपुंगवैः ६६ ६ श्री हा रते
शतसाहस्र्यांसंहितायांवैयासिक्यांआदिपर्वणिविचित्रवीर्योपरमः १०० वैशंपायनउ च ततःसत्यवतीदीनाकृपणापुत्रगृद्धिनी
पुत्रस्यकृत्वाकार्याणिस्नुषाभ्यांसहभारत १ समाश्वास्यस्नुषेतेचभीष्मंशस्त्रभृतांवरं धर्मंचपितृवंशंचमातृवंशंचभाविनी प्रसमी
क्ष्यमहाभागागांगेयंवाक्यमब्रवीत् २ शंतनोर्धर्मनित्यस्यकौरव्यस्ययशस्विनः त्वयिपिंडश्चकीर्तिश्चसंतानंचप्रतिष्ठितं ३ यथाकर्म म०भा०
शुभंकृत्वास्वर्गोपगमनंध्रुवं यथाचायुर्ध्रुवंसत्येत्वयिधर्मस्तथाध्रुवः ४ ॥ ॥ ॥ ॥ १००

इतरेणविस्तरेण ५ ६ ७ आश्वस्यविश्वासंप्राप्य १० राज्येचैवराज्यस्यवा आत्मानं अभिषेचय कुरुब्रह्मचर्यसंकल्पात्प्रभृति त्यक्त्वा नसंततम् यसंगीकुरु मानिमज्जीःमा

वेत्थधर्मांश्चधर्मज्ञसमासेनेतरेणच विविधास्त्वंश्रुतीर्वेत्थवेदांगानिचसर्वशः ५ व्यवस्थानंचतेधर्मेकुलाचारंचलक्षये प्रतिपत्तिंच
कृच्छ्रेषुशुक्रांगिरसयोरिव ६ तस्मात्सुभृशमाश्वास्यत्वयिधर्मभृतांवर कार्येत्वांविनियोक्ष्यामितच्छ्रुत्वाकर्तुमर्हसि ७ ममपुत्रस्तव
भ्रातावीर्यवान्सुप्रियश्चते बालएवगतःस्वर्गमपुत्रःपुरुषर्षभ ८ इमेमहिष्यौभ्रातुस्तेकाशिराजसुतेशुभे रूपयौवनसंपन्नेपुत्रका
मेचभारत ९ तयोरुत्पादयापत्यंसंतानायकुलस्यनः मन्नियोगान्महाबाहोधर्मंकर्तुमिहार्हसि १० राज्येचैवाभिषिच्यस्वभारताननुशा
धिच दारांश्चकुरुधर्मेणमामाविमज्जीःपितामहान् ११ वैशंपायनउवाच तथोच्यमानोमात्राचसुहृद्भिश्चपरंतपः इत्युवाचाथधर्मात्मा
धर्म्यमेवोत्तरंवचः १२ असंशयंपरोधर्मस्त्वयामातरुदाहृतः त्वमपत्यंप्रतिचमेप्रतिज्ञांवेत्थवैपरां १३ जानासिचयथावृत्तंशुल्कहेतो
स्त्वदंतरे ससत्यवतिसत्यंतेप्रतिजानाम्यहंपुनः १४ परित्यजेयंत्रैलोक्यंराज्यंदेवेषुवापुनः यद्वाप्यधिकमेताभ्यांनतुसत्यंकथंचन
१५ त्यजेच्चपृथिवीगंधमापश्चरसमात्मनः ज्योतिस्तथात्यजेद्रूपंवायुःस्पर्शगुणंत्यजेत् १६ प्रभांसमुत्सृजेदर्कोधूमकेतुस्तथोष्मतां
त्यजेच्छब्दंतथाकाशंसोमःशीतांशुतांत्यजेत् १७ विक्रमंवृत्रहाजह्याद्धर्मंजह्याच्चधर्मराट् नत्वहंसत्यमुत्स्रष्टुंव्यवसेयंकथंचन १८

निमज्जय ११ १२ १३ त्वदंतरेत्वन्निमित्तं १४ १५ १६ १७ १८ ॥रामराम

आ॰ २०१

भूरिद्रविणतेजसाबाहुबलोत्साहवता १९ २० २१ २२ २३ २४ २५ २६॥

एवमुक्तानुपुत्रेणाभूरिद्रविणतेजसा मातासत्यवतीभीष्ममुवाचतदनंतरं १९ जानामितेस्थितिंसतेपरांसत्यपराक्रम
इछतस्तेजेयाह्रीह्लोकानन्यान्स्वेनतेजसा २० जानामिचैवसत्यंतन्मदर्थेयच्चभाषितं। आपद्धर्मत्वमावेक्ष्यवह
पैतामहीधुरं २१ यथातेकुलतंतुश्चधर्मश्चनपराभवेत् सुहृदश्चप्रहृष्येरंस्तथाकुरुपरंतप २२ लालप्यमानां
तामेवंकृपणांपुत्रगृद्धिनी धर्मादपेतंब्रुवतींभीष्मोभूयोऽब्रवीदिदं २३ राज्ञिधर्माननवेक्षस्वमानःसर्वान्मनीन
शः सत्याच्युतिःक्षत्रियस्यनधर्मेषुप्रशस्यते २४ शांतनोरपिसंतानंयथास्यादक्षयंभुवि तत्तेधर्मंप्रवक्ष्यामिक्षा
त्रंराज्ञिसनातनं २५ श्रुत्वातंप्रतिपद्यस्वप्राज्ञैःसहपुरोहितैः आपद्धर्मार्थकुशलैर्लोकतंत्रमवेक्ष्यच २६॥

राम॰ २०१

अध्यायः ज्ञाम० ५ पाणिग्राहस्येति ननु कथं तर्हि मातामहस्यापि तुः पुत्रो येन जातः स एव स इत्युक्तं वरो यो ऽन्ये अन्यजातमपि अन्यो दर्येमनसापि नमंतथो ममायं पुत्र
इति शेषः शरीरोत्पत्त्यत्वं अन्यजस्य नास्तीति स्कंति सन्तो ऽदर्शनं चान्यक्षेत्रे स्वस्मात् स्वक्षेत्रे वा ऽन्यस्माज्जातो न स्वपुत्र इति सिद्धं अत आह धर्ममिति धर्मं ममायं पुत्रो भ
विष्यतीत्यभिलाषं अपरे खलु कृतेन वः पुरुष इति संकल्पप्राधान्यमुक्तं स्त्रीपुंसयोर्मध्ये यस्य संकल्पो दृढस्तस्यैव पुत्र इत्यर्थः मातामहस्येति तु विवाहविषयं न त्वेवं

इत्यादि पर्वणि भीष्मं च ज्ञाम० रग्नेन रामेण पितुर्वधममृष्यता रात्रा परशुना पूर्वं हैहयाधिपतिर्हतः १ शतानि दश बाहूनां नि
कृत्तान्यर्जुनस्य वै लोकस्याचरितो धर्मस्तेनाभिकिल दुस्तरः २ पुनश्च धनुरादाय महास्त्राणि प्रमुंचता निर्दग्धं क्षत्रमसकृद्रथेन
जयता वरः ३ एवमुच्चावचैरस्त्रैर्भार्गवेण महात्मना त्रिःसप्तकृत्वः पृथिवी कृता निःक्षत्रिया पुनः ४ ततः संभूय सर्वाभिः क्षत्रिया
भिः समंततः उत्पादितान्यपत्यानि ब्राह्मणैर्वेदपारगैः पाणिग्राहस्य तनय इति वेदेषु निश्चितं धर्मं मनसि संस्थाप्य ब्राह्मणांस्ताः समभ्य
युः ततः पुनः समुदितं क्षत्रं समभवत्तदा इमं चैवात्र वक्ष्येहमितिहासं पुरातनं ७ अथोतथ्य इति ख्यात आसीद्धीमान् ऋषिः पुरा ममता
नाम तस्यासीद्भार्या परमसंमता ८ ॥

लोके ऽप्याचरितो दृष्टः क्षत्रियाणां पुनर्भवः १

शालिक्षेत्रे यवबीजादपि शाल्यंकुरोत्पत्तिः स्यादिति चेन्न दावाग्निदग्धात् कदलीकांडादपि वंशांकुरोत्पत्तिदृष्टेः श्वमस्तके कमुसादौ भवमयावनालादेः पलांडुलशुनां
कुरोत्पत्तिदृष्टेश्च भावनाविशेषजन्यधर्मस्यैव विशेषाधायकत्वाभ्युपगमात् धनादिना उपनिमंत्रणाच्च क्षेत्रपतेरेव सा संततिर्नबीजिनस्य ६ लोके इति कल्माष
पादक्षेत्रे मदयंत्यां वसिष्ठेन पुत्रा उत्पादिता इति भावः क्षत्रियाणां पुनर्भव इत्यर्थः ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥।

१ लोके ऽप्याचरितो नुष्ठितो दृष्टः क्षत्रियाणां भव उत्पत्तिर्ब्राह्मणेभ्य इति शेषः १

आ०
१०२

अन्वपद्यत उपगतवान् ९ आरेभे तां उपरमस्व १० ११ आर्त्तं नं वितानं वितानं नियच्छितुं नियन्तुं १३ १४ कामं मैथुनं मा गमः १५ १८ तं शशापेति संबंधः

उतथ्यस्य यवीयांस्तु पुरोधास्त्रिदिवौकसां वृहस्पतिर्वृहत्तेजा ममतामन्वपद्यत ९ उवाच ममता तं तु देवरं वदतां वरं अंतर्वत्नी त्वहं भ्रात्रा ज्येष्ठेना
रम्यतामिति १० अयं च मे महाभाग कुक्षावेव वृहस्पते औतथ्यो वेदमत्रैव षडंगं प्रत्यधीयत ११ अमोघरेतास्त्वं चापि द्वयोर्नास्त्यत्र संभवः
तस्मादेवं गते त्वद्य उपारमितुमर्हसि १२ एवमुक्तस्तदा सम्यग्वृहस्पतिरुदारधीः कामात्मानं तदात्मानं न शशाक नियच्छितुं १३ स
वभूव ततः कामी तया सार्द्धमकामया उत्सृजंतं तु तं रेतः स गर्भस्थोऽभ्यभाषत १४ भोस्तात मा गमः कामं द्वयोर्नास्तीह संभवः अल्पाव
काशो भगवन्पूर्वं चाहमिहागतः १५ अमोघरेताश्च भवान्न पीडां कर्त्तुमर्हसि अश्रुत्वैव तु तद्वाक्यं गर्भस्थस्य वृहस्पतिः जगाम मैथुना
यैव ममतां चारुलोचनां १६ शुक्रोत्सर्गं ततो बुद्ध्वा तस्या गर्भगतो मुनिः पद्भ्यामारोधयन्मार्गं शुक्रस्य च वृहस्पतेः १७ स्थानमप्राप्त
मथ तद्रेतः प्रतिहतं तदा पपात सहसा भूमौ ततः क्रुद्धो वृहस्पतिः १८ तं दृष्ट्वा पतितं शुक्रं शशाप स रुषान्वितः उतथ्यपुत्रं गर्भस्थं
निर्भर्त्स्य भगवानृषिः १९ यन्मां त्वमीदृशे काले सर्वभूतेप्सिते सति एवमात्थ वचस्तस्मात्तमो दीर्घं प्रवेक्ष्यसि २० स वै दीर्घतमा नाम
शापादृषिरजायत वृहस्पतेर्वृहत्कीर्त्तेर्वृहस्पतिरिवौजसा २१ स पुत्राञ्जनयामास गौतमादीन्महायशाः ऋषेरुतथ्यस्य तदा संता
नकुलवृद्धये २२ ॥

१९ दीर्घतमः अंधत्वं २० २१ सम्यक्तानं विस्तारो यस्य तस्य कुलस्य वृद्धये विस्तीर्णस्यापि वृद्धये तर्पः २२ ॥ शाम०
१०२

गोधर्मप्रकाशमैथुनं सौरभेयात् कामधेनुपुत्रात् अधीत्य अधिगम्य २३ मोहाभिभूतत्वं अपायेपायदर्शित्वात् २४ २५ मज्जनगतः स्नानार्थं गतः ३३ स्रोतसा प्रवाहेणात्र

धर्मात्मा च महात्मा च वेदवेदांगपारगः गोधर्मं सौरभेयाच्च सोऽधीत्य निखिलं मुनिः प्रावर्त्तत तदा कर्तुं श्रद्धावांस्तदशंकया २३ ततो वितथमर्यादं तं दृष्ट्वा मुनिसत्त
माः क्रुद्धा मोहाभिभूतास्ते सर्वे तत्राश्रमौकसः २४ अहोऽयं भिन्नमर्यादो नाश्रमे वस्तुमर्हति तस्मादेनं वयं सर्वे पापात्मानं त्यजामहे २५ इत्यन्योन्यं समा
भाष्य ते दीर्घतमसं मुनिं जात्यंधो वेदवित्प्राज्ञः पत्नीं लेभे स विद्यया तरुणीं रूपसंपन्नां प्रद्वेषीं नाम ब्राह्मणीं आसेरुतथ्यस्य महान्संतानकुलवृद्धये स पुत्रान्ज
नयामास गौतमादीन्महायशाः पुत्रलाभाच्च सा पत्नी न तुतोष पतिं तदा प्रद्वेषीं तु पतिर्भार्यां किं मां द्विषसि चाब्रवीत् इत्युवाच पतिर्भार्यां तु भरणाद्भर्ता चेति
प्रकीर्तितः अहं त्वत्प्रभरणे क्लान्ता जात्यंधं ससुतांस्तदा नित्यकालं च मे भर्त्तुं न भरेयं महायशः भीष्म उवाच तस्यास्तद्वचनं श्रुत्वा ऋषिः कोपसमन्वितः प्रत्युवाच ततः
पत्नीं प्रद्वेषीं ससुतां तदा नीयतां क्षत्रियकुलं धनार्थं च भविष्यति प्रत्युवाचैवं तया दत्तं धनं पुत्रैर्नेच्छेयं स्वल्पकारणं यथेष्टं कुरु विप्रेंद्र न भरेयं यथा पुरा दीर्घतमा उ
वाच अद्यप्रभृति मर्यादा मया लोके प्रतिष्ठिता एक एव पतिर्नार्या यावज्जीवं परायणं मृते जीवति वा तस्मिन्नापरं प्राप्नुयान्नरं अभिगम्य परं नारी पतिष्यति न सं
शयः अपतीनां तु नारीणामद्यप्रभृति पातकं यदृच्छयागता या स्तु वृथा भोगं भवन्तु वै अकीर्तिः परिवादाश्च नित्यकालं भवंतु वै भीष्म उवाच तस्यास्तद्वचनं श्रुत्वा ब्रा
ह्मणी भृशकोपिता गंगायां नीयतामेष पुत्रा इत्येवमब्रवीत् २६ लोभमोहाभिभूतास्ते पुत्रास्ते गौतमादयः बध्वोडुपे परिक्षिप्य गंगायां समवासृजन् २७ कस्मा
दंधश्च वृद्धश्च भर्त्तव्योऽयमिति स्म ते चिंतयित्वा ततः क्रूराः प्रतिजग्मुरथो गृहान् २८ सोऽनुस्रोतस्तदा विप्रः प्लवमानो यदृच्छया जगाम सुबहून्देशानंधस्तेनो
डुपेन ह तं तु राजा बलिर्नाम सर्वधर्मविदां वरः अपश्यन्मज्जनगतः स्रोतसाभ्याशमागतं ३० जग्राह चैनं धर्मात्मा बलिः सत्यपराक्रमः ज्ञात्वा चैवं स वव्रे
पुत्रार्थे भरतर्षभ ३१ संतानार्थं महाभाग भार्यासु मम मानद पुत्रान्धर्मार्थकुशलानुत्पादयितुमर्हसि ३२ एवमुक्तः स तेजस्वी तं तथेत्युक्तवानृषि
स्तस्मै स राजा स्वां भार्यां सुदेष्णां प्राहिणोत्तदा ३३ अंधं वृद्धं च तं मत्वा न सा देवी जगाम ह स्वां तु धात्रेयिकां तस्मै वृद्धाय प्राहिणोत्तदा ३४ तस्यां काक्षी
वदादीन्स शूद्रयोनावृषिस्तदा जनयामास धर्मात्मा पुत्रानेकादशैव तु ३५ काक्षीवदादीन्पुत्रांस्तान्दृष्ट्वा सर्वानधीयतः उवाच तमृषिं राजा ममैत इ
ति भारत ३६ नेत्युवाच महर्षिस्तं ममैव इति चाब्रवीत् शूद्रयोनौ मया ही मे जाताः काक्षीवदादयः ३७ अंधं वृद्धं च मां दृष्ट्वा सुदेष्णा महिषी तव अवमन्य ददौ

मासे समीपं ३० ३१ ३२ धात्रेयिकां दासीं ३४ ३५ ३६ ३७ ३८ ॥ ॥ ॥ ॥ ॥ ॥

अंगेषु स्पृष्ट्वा स्वरूपज्ञानार्थमिति भावः संविदार्षः ४० ४४ यद्येषिनितं ब्राह्मणेभ्यो वंशवृद्धिमिति यर्थः ४५ अथाय पुनः २ संसज्जमानया स्खलनवत्या ३ विश्वा

ततः प्रसादयामास पुनस्तमृषिसत्तमं बलिः सुदेष्णां तां भार्यां तस्मै स प्राहिणोत्पुनः ३९ तां स दीर्घतमांगेषु स्पृष्ट्वा देवीमथाब्रवीत् भवि
ष्यंति कुमारास्ते तेजसादित्यवर्चसः ४० अंगो वंगः कलिंगश्च पुंड्रः सुह्मश्च ते सुताः तेषां देशाः समाख्याताः स्वनामकथिता भुवि अं
गस्यांगोभवद्देशो वंगो वंगस्य च स्मृतः कलिंगविषयश्चैव कलिंगस्य च स स्मृतः ४२ पुंड्रस्य पुंड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः एवं
बलेः पुरा वंशः प्रख्यातो वै महर्षिणा ४३ एवमन्ये महेष्वासा ब्राह्मणैः क्षत्रिया भुवि जाताः परमधर्मज्ञा वीर्यवंतो महाबलाः ४४ एत
च्छ्रुत्वा त्वमप्यत्र मातः कुरु यथेप्सितं ४५ इत्यादिपर्वणि भीष्मउ च पुनर्भरतवंशस्य हेतुं संतानवृद्धये वक्ष्यामि नियतं मातस्तन्मे
निगदतः शृणु १ ब्राह्मणो गुणवान्कश्चिद्धनेनोपनिमंत्र्यतां विचित्रवीर्यक्षेत्रेषु यः समुत्पादयेत्प्रजाः २ वैशंपायनउ च ततः स
त्यवती भीष्मं वाचा संसज्जमानया विहसंतीव सव्रीडमिदं वचनमब्रवीत् ३ सत्यमेतन्महाबाहो यथा वदसि भारत विश्वासात्ते प्रवक्ष्या
मि संतानाय कुलस्य तः ४ न ते शक्यमनाख्यातुमापद्धर्मं तथाविधं त्वमेव नः कुले धर्मस्त्वं सत्यं त्वं परा गतिः ५ तस्मान्निशम्य सत्यं मे
कुरुष्व यदनंतरं धर्मयुक्तस्य धर्मात्मन्पितुरासीत्तरी मम सा कदाचिदहं तत्र गता प्रथमयौवने ६ अथ धर्मविदां श्रेष्ठः परमर्षिः परा
शरः आजगाम तरीं धीमांस्तरिष्यन्यमुनां नदीं ७ स तार्यमाणो यमुनां मामुपेत्याब्रवीत्तदा सांत्वपूर्वं मुनिश्रेष्ठः कामार्त्तो मधुरं
वचः ८ एतदध्येपंचममत्रौनकपृष्ठस्थम ॥

स्यात् अंतरं गत्वा बुद्धेः संतानाय विस्तारय ४ आपद्धर्मं अवेक्ष्येति शेषः धर्मः धर्मरक्षकः ५ सत्यं वचनमिति शेषः ८ तरी नौका ६ ७ ८ ॥ ॥ ॥

उक्तामत्स्योद्भिन्नेत्यर्थः ९ वाल्लांपुंयोगमनिर्विष्टांनीवाल्लामिव १० मामकंगर्भमुत्सृज्यकन्यैवत्वंभविष्यसीतिमुनिवचनात्तज्ञातापत्यायाञ्चपिमकन्यात्वा
विनाशात्पुनर्दाशसंसर्गजंहीनवर्णत्वंनाभूत्तकन्यात्वावस्थायांकामभङ्गादिनिषेधाभावात्किंचपृथ्यासत्यवत्योरनिष्ठंसौरेवसूर्यपराशराभ्यांञ्चपत्योत्पादनंकृतंञ्च

त्या१

तमहंशापभीताचपितुर्भीताचभारत वैरस्सुलभैर्वाक्यैर्नप्रत्याख्यातुमुत्सहे ९ अभिभूयसमां वालांतेजसावरयमानयत् तमसालोकमा
वृत्यनौगतामेवभारत १० मत्स्यगंधोमहानासीत्पुराममजुगुप्सितः तमपास्यशुभंगंधमिमंप्रादात्समेमुनिः ११ ततोमामाहसमुनिःगर्भ
मुत्सृज्यमामकं द्वीपेस्यास्यवसरितःकन्यैवत्वंभविष्यसि १२ पाराशर्योमहायोगीसवभूवमहानृषिः कन्यापुत्रोममपुराद्वैपायनइतिश्रुतः
१३ योव्यस्यवेदांश्चतुरस्तपसाभगवानृषिः लोकेव्यासत्वमापेदेकार्ष्ण्यात्कृष्णत्वमेवच १४ सत्यवादीशमपरस्तपस्वीदग्धकिल्विषः सनि
युक्तोमयाव्यक्तंत्वयाचाप्रतिमकृतिः भ्रातुःक्षेत्रेषुकल्याणमपत्यंजनयिष्यति १५ सहिमामुक्तवांस्तत्रस्मरेःकृत्येषुमामिति तंस्मरि
ष्येमहाबाहोयदिभीष्मत्वमिच्छसि १६ तवह्यनुमतेभीष्मनियतंसमहातपाः विचित्रवीर्यक्षेत्रेषुपुत्रानुत्पादयिष्यति वैशंपायनउवाच
महर्षेःकीर्तनेतस्यभीष्मःप्राञ्जलिरब्रवीत् धर्ममर्थंचकामंचत्रीनेतान्योनुपश्यति १८ अर्थमर्थानुबंधंचधर्मंधर्मानुबंधनं कामंका
मानुबंधंचविपरीतान्पृथक्पृथक् १९

तोनत्तयोःकन्यात्वोच्छित्तिरितिभावः १३ कार्ष्ण्यात्कृष्णत्वात्ईश्वरएदन्यत्वादेवकृष्णत्वमित्यर्थः १४ व्यक्तंनिःसंशयं १५ १६ १७ १८ १९ ॥

आ० १०४

अनुबध्नातेनेनेमनुबंधः फलंपरिणामेसुखकरमेवअर्थाधिकंतद्विपर्ययंवाऽर्थनाशादिकंपश्येतअत्रमत्यदोषानुसंधानेनपहतः फलस्यनाशोनकार्यइत्यभिप्रायः १८

योविचिंत्यधियाधीरोव्यवस्यतिसबुद्धिमान् तदिदंधर्मयुक्तंचहितंचैवकुलस्यनः उक्तंभवत्यायच्छ्रेयःपरंमह्यंरोचतेभृशं १० वैशंपाय
नउवाच ततःतस्मिन्प्रतिज्ञातेभीष्मेणकुरुनंदन कृष्णद्वैपायनंकालीचिंतयामाससैवमुनिं २१ सवेदान्विब्रुवन्धीमान्मातुर्विज्ञायचिंतितं
प्रादुर्बभूवविदितःक्षणेनकुरुनंदन २२ तस्मैपूजांततःकृत्वासुतायविधिपूर्वकं परिष्वज्यचबाहुभ्यांप्रस्नवैरभ्यषिंचत २३ मुमोचबाष्पंदाशेयी
पुत्रंदृष्ट्वाचिरस्यतु तामद्भिःपरिषिंच्यार्त्तांमहर्षिरभिवाद्यच मातरंपूर्वजःपुत्रोव्यासोवचनमब्रवीत् २४ भवत्यायदभिप्रेतंतदहंकर्त्तुमागतः
शाधिमांधर्मतत्वज्ञेकरवाणिप्रियंतव २५ तस्मैपूजांततोकार्षीत्पुरोधाःपरमर्षये सचतांप्रतिजग्राहविधिवन्मंत्रपूर्वकं २६ तमासन
गतंमातापृष्ट्वाकुशलमव्ययं सत्यवत्यभिवीक्ष्यैनमुवाचेदमनंतरं २७ मातापित्रोःप्रजायंतेपुत्रासाधारणाःकवेः तेषांपितायथा
स्वामीतथामातानसंशयः विधानविहितःसत्वंयथामेप्रथमःसुतः विचित्रवीर्योब्रह्मर्षेतथामेवरजःसुतः २९ यथैवपितृतोभीष्मस्तथा
त्वमपिमातृतः भ्राताविचित्रवीर्यस्ययथावापुत्रमन्यसे ३० अयंशांतनवःसत्यंपालयन्सत्यविक्रमः बुद्धिंनकुरुतेपत्येतथाराज्यानुशा
सने ३१ सत्वंव्यपेक्षयाभ्रातुःसंतानायकुलस्यच भीष्मस्यचास्यवचनान्नियोगाच्चममानघ ३२ अनुक्रोशाच्चभूतानांसर्वेषांरक्षणाय
च आनृशंस्याच्चयद्ब्रूयांतच्छ्रुत्वाकर्त्तुमर्हसि ३३

विधानविहितःपूर्वपुराणप्रसूतः ३१ व्यपेक्षयास्नेहानुबंधेननियोगात्आज्ञातः ३२ अनुक्रोशात्कृपातःआनृशंस्यात्अनैष्ठुर्यात् ३३ ३३ ॥

राम० १०४

३५ परंधर्मंनिवृत्तिरूपंच अपरंधर्मंप्रवृत्तिरूपंआमुष्मिकमैहिकमिति ३६ देव्यौराजभार्ये ४० तथायथाभीष्मेणोक्तंतथामांप्राप्यपदृष्टार्थेनयोजय ४८

यवीयसस्तवभ्रातुर्भार्ये सुरसुतोपमे रूपयौवनसंपन्ने पुत्रकामे च धर्मतः ३४ तयोरुत्पादयापत्यं समर्थो ह्यसि पुत्रक अनुरूपं कुलस्यास्य
संतत्याः प्रसवस्य च ३५ व्यास उवाच वेत्थ धर्मं सत्यवति परं चापरमेव च तथा तव महाप्राज्ञे धर्मे प्रणिहिता मतिः ३६ तस्मादहं त्वन्नियोगाद्धर्ममु
द्दिश्य कारणं ईप्सितं ते करिष्यामि दृष्टं ह्येतत्सनातनं ३७ भ्रातुः पुत्रान्प्रदास्यामि मित्रावरुणयोः समान् व्रतं चरेतां ते देव्यौ निर्दिष्टमिह य
न्मया ३८ संवत्सरं यथान्यायं ततः शुद्धे भविष्यतः नहि मामव्रतोपेता उपेयात्काचिदंगना ३९ सत्यवत्युवाच सद्यो यथा प्रपद्येते देव्यौ गर्भं त
था कुरु अराजकेषु राष्ट्रेषु नास्ति वृष्टिर्न देवताः कथं त्वराजकं राष्ट्रं शक्यं धारयितुं प्रभो तस्माद्गर्भं समाधत्स्व भीष्मः संवर्धयिष्यति ४१ व्यास उ
वाच यदि पुत्रः प्रदातव्यो मया भ्रातुरकालिकः विरूपतां मे सहतां तयोरेतत्परं व्रतं ४२ यदि मे सहते गंधं रूपं वेषं तथा वपुः अद्यैव गर्भं कौश
ल्या विशिष्टं प्रतिपद्यतां ४३ वैशंपायन उवाच एवमुक्त्वा महातेजा व्यासः सत्यवतीं तदा समागमनमाकांक्षन्निति सोंतर्हितो मुनिः ४४
ततोभिगम्य सा देवी स्नुषां रहसि संगतां धर्म्यमर्थसमायुक्तमुवाच वचनं हितं ४५ कौशल्ये धर्मतंत्रं त्वां यद्ब्रवीमि निबोध तत् भरतानां समु
च्छेदो व्यक्तं मन्दभाग्यसंक्षयात् ४६ व्यथितां मां च संप्रेक्ष्य पितृवंशं च पीडितं भीष्मो बुद्धिमदान्मह्यं कुलस्यास्य विवृद्धये ४७ सा च बुद्धिस्त्व
य्यधीना पुत्रि प्रापय मां तथा नष्टं च भारतं वंशं पुनरेव समुद्धर ४८

उद्धक्ष्यतिधुरउद्वहनंकरिष्यति ४९ सनांपुरुषांतरस्पर्शमनिच्छंतीमितिरक्षयतिकथंचिदिति ५० अध्यायः ततः १ अनुप्रवेक्ष्यतिपुत्रस्त्वेणतवोदरं आगमिष्यति २

पुत्रंजनयसुश्रोणिदेवराजसमप्रभं सहिराज्यधुरंगुर्वीमुद्वक्ष्यतिकुलस्यनः ४९ साधर्मतोनुनीयैनांकथंचिद्धर्मचारिणीं भोजयामा
सविप्रांश्चदेवर्षीनतिथींश्चत्था ५० इत्यादिपर्वणि वैशंपायनउवाच ततःसत्यवतीकालेवधूंस्नातामृतौतदा संवेशयंतीशयनेश
नैर्वचनमब्रवीत् १ कौशल्येदेवरस्तेस्तिसोद्यत्वानुप्रवेक्ष्यति अप्रमत्ताप्रतीक्षैनंनिशीथेत्यागमिष्यति २ श्वश्र्वास्तद्वचनंश्रुत्वाशयाना
शयनेशुभे साचिंतयत्तदाभीष्ममन्यांश्चकुरुपुंगवान् ३ ततोंबिकायांप्रथमंनियुक्तः सत्यवागृषिः दीप्यमानेषुदीपेषुशरणंप्रविवेश
ह ४ तस्यकृष्णस्यकपिलाजटादीप्तेचलोचने बभ्रूणिचैवश्मश्रूणिदृष्ट्वादेवीन्यमीलयत् ५ संबभूवतयासार्धंमातुःप्रियचिकी
र्षया भयात्काशिसुतातंतुनाशक्नोदभिवीक्षितुं ६ ततोनिष्क्रांतमागम्यमातापुत्रमुवाचह अप्यस्यांगुणवान्पुत्रराजपुत्रोभविष्यति
७ निशम्यतद्वचोमातुर्व्यासः सत्यवतीसुतः प्रोवाचातींद्रियज्ञानोविधिनासंप्रचोदितः ८ नागायुतसमप्राणोविद्वान्राजर्षिसत्तमः
महाभागोमहावीर्योमहाबुद्धिर्भविष्यति ९ तस्यचापिशतंपुत्राभविष्यंतिमहात्मनः किंतुमातुःसवैगुण्यादंधएवभविष्यति १० १०

अचिंतयदिति अनेनगर्भधारणकालेयंपुरुषंस्त्रीचिंतयतितादृग्गुणःपुत्रोभवतीतिसूचितं ३ शरणंगृहे ४ ५ ६ ७ ८ ९ १० ॥ ॥ ॥ ॥

१८ सत्यासत्यवती १९ २० २१ २२ २३ २४ २५ २६ अभुजिष्याप्रदासी २७

तस्यास्तद्वचनं श्रुत्वा माता पुत्रमथाब्रवीत् नांधः कुरूणां नृपतिरनुरूपस्तपोधन १७ ज्ञातिवंशस्य गोप्तारं पितॄणां वंशवर्द्धनं द्वितीयं
कुरुवंशस्य राजानं दातुमर्हसि १८ स तथेति प्रतिज्ञाय निश्चक्राम महायशाः सापि कालेन कौशल्या सुषुवेंधमात्मजं पुनरेव तु सा दे
वी परिभाष्य स्नुषां ततः ऋषिमावाहयत्सत्या यथापूर्वमरिंदमः ततस्तेनैव विधिना महर्षिस्तामपद्यत अंबालिकामथाभ्यागादृषिं दृ
ष्ट्वात्र सापि तं विवर्णा पांडुसंकाशा समपद्यत भारत १५ तां भीतां पांडुसंकाशां विषण्णां प्रेक्ष्य भारत व्यासः सत्यवतीपुत्र इदं वचनम
ब्रवीत् १६ यस्मात्पांडुत्वमापन्ना विरूपं प्रेक्ष्य मामिह तस्मादेष सुतस्तुभ्यं पांडुरेव भविष्यति नाम चास्य तदेवेह भविष्यति शुभानने इत्यु
क्त्वा स निराक्रामद्भगवानृषिसत्तमः ततो निष्क्रांतमालोक्य सत्या पुत्रमथाब्रवीत् शशंस स पुनर्मात्रे तस्य बालस्य पांडुतां तं माता पुनरेवा
न्यमेकं पुत्रमयाचत तथेति च महर्षिस्तां मातरं प्रत्यभाषत ततः कुमारं सा देवी प्राप्तकालमजीजनत् पांडुलक्षणसंपन्नं दीप्यमानमि
व श्रिया यस्य पुत्रा महेष्वासा जज्ञिरे पंच पांडवाः ऋतुकाले ततो ज्येष्ठां वधूं तस्मै न्ययोजयत् सा तु रूपं च गंधं च महर्षेः प्रविचिंत्य तं ना
करोद्वचनं देव्या भयात्सुरसुतोपमा २३ ततः स्वैर्भूषणैर्दासीं भूषयित्वाप्सरोपमां प्रेषयामास कृष्णाय ततः काशिपतेः सुता २४ सा तं
ऋषिमनुप्राप्तं प्रत्युद्गम्याभिवाद्य च संविवेशाभ्यनुज्ञाता सत्कृत्योपचचार ह २५ कामोपभोगेन रहस्तस्यां तुष्टिमगादृषिस्तया सहो
षितो राजन्महर्षिः शंशितव्रतः २६ उत्तिष्ठन्नब्रवीदेनां अभुजिष्या भविष्यसि अयं च ते शुभे गर्भः श्रेयानुदरमागतः धर्मात्मा भवि
ता लोके सर्वबुद्धिमतां वरः २७ ॥

ध्यानामुक्तिशिष्यापुत्रस्यापि भ्रातृत्वं पितृत्वं च व्यधात् २८ २९ प्रलंभं आत्मस्थाने दासीति योजनं ३० ३१ सत इति क्षेत्रत्वं दास्या अपीत्यनेनैव गम्यत इति केचित् ३२ अध्यायः।। किं

सजज्ञे विदुरो नाम कृष्णद्वैपायनात्मजः धृतराष्ट्रस्य वै भ्राता पाण्डोश्चैव महात्मनः २८ धर्मो विदुररूपेण शापात्तस्य महात्मनः मांडव्यस्या
र्थतत्त्वज्ञः कामक्रोधविवर्जितः २९ कृष्णद्वैपायनोप्येतत्सत्यवत्यै न्यवेदयत् प्रलंभमात्मनश्चैव शूद्रायां पुत्रजन्म च ३० स धर्मस्यान
णो भूत्वा पुनर्मात्रा समेत्य च तस्यै गर्भं समावेद्य तत्रैवान्तरधीयत ३१ एते विचित्रवीर्यस्य क्षेत्रे द्वैपायनादपि जज्ञिरे देवगर्भाभाः कुरुवंश
विवर्द्धनाः इत्यादिपर्वणि विचित्रवीर्यसुतोत्पत्तिः जनमेजय उ च किंकृतं कर्म धर्मेण येन शापमुपेयिवान् कस्य शापाच्च ब्रह्मर्षेः शू
द्रयोनावजायत १ वैशंपायन उवाच बभूव ब्राह्मणः कश्चिन्मांडव्य इति विश्रुतः धृतिमान्सर्वधर्मज्ञः सत्ये तपसि च स्थितः २ स आश्रम
पदद्वारि वृक्षमूले महातपाः ऊर्ध्वबाहुर्महायोगी तस्थौ मौनव्रतान्वितः ३ तस्य कालेन महता तस्मिंस्तपसि वर्त्तते तमाश्रममनुप्रा
प्ता दस्यवो लो[illegible]हहारिणः ४ अनुसार्यमाणा बहुभी रक्षिभिर्भरतर्षभ ते तस्यावसथे लो[illegible]दस्यवः कुरुसत्तम ५ निधाय च भयाल्लीना
स्त[illegible]त्रैवानागते बले ५ तेषु लीनेष्वथो शीघ्रं ततस्तद्रक्षिणां बलं आजगाम ततोपश्यंस्तमृषिं तस्करानुगाः ६ तमपृच्छंस्ततो राजं
स्तथावृत्तं तपोधनं कतमेन पथा याता दस्यवो द्विजसत्तम ७ तेन गच्छाम हे ब्रह्मन्यथा शीघ्रतरं वयं ७ तथा तु रक्षिणां तेषां ब्रुवतां स त
पोधनः न किंचिद्वचनं राजन्नवदत्साध्वसाधु वा ९ ततस्ते राजपुरुषा विचिन्वानास्तमाश्रमं ददृशुस्तत्र लीनांस्तांश्चोरांस्तद्द्रव्यमेव च १०

कृतं ३ लोप्त्रं लुप्यत इति व्युत्पत्त्या चौर्यधनं तद्धनं ४ ५ ६ ७ ८ ९ १० ।। ।। ।। ।।

संयम्य चोरवत्रिगृह्य ११ १२ १३ १४ ऋषीनवेदान समुपानयत स्वाधीनान करोत् । किं वेदनातोऽपि वेदात्र विस्मृतवानित्यर्थः यद्वा ऋषीन्मुनीन स्वसमीपे उपानयदित्युक्तं

ततः शंका समभवद्रक्षिणां तं मुनिं प्रति संयम्यैनं ततो राज्ञे दस्यूंश्चैव न्यवेदयन् ११ तं राजा सह तैश्चोरैरन्वशाद्वध्यतामिति स रक्षि
भिस्तैरज्ञातः शूले प्रोतो महातपाः १२ ततस्ते शूलमारोप्य तं मुनिं रक्षिणस्तदा प्रतिजग्मुर्महीपालं धनान्यादाय तान्यथ १३ शूल
स्थः स तु धर्मात्मा कालेन महता ततः निराहारोऽपि विप्रर्षिर्मरणं नाभ्यपद्यत १४ धारयामास च प्राणान् ऋषींश्च समुपानयत् शूला
ग्रे तप्यमानेन तपसा तेन महात्मना संतापं परमं जग्मुर्मुनयस्तपसान्विताः १५ ते रात्रौ शकुना भूत्वा सन्निपत्य तु भारत दर्शयन्तो यथा
शक्ति तमपृच्छन् द्विजोत्तमं १६ श्रोतुमिच्छामहे ब्रह्मन् किं पापं कृतवानसि येनेह समनुप्राप्तं शूले दुःखभयं महत् १७ इत्यादि
पर्वणि वैशंपायन उवाच ततः स मुनिशार्दूलस्तानुवाच तपोधनान् दोषतः कं गमिष्यामि न हि मेऽन्योऽपराध्यति १ तं दृष्ट्वा रक्षिणा
स्तत्र तथा बहुतिथेऽहनि न्यवेदयंस्तथा राज्ञे यथा वृत्तं नराधिप २ राजा च तमृषिं श्रुत्वा निष्क्रम्य सह मंत्रिभिः प्रसादयामास तदा
शूलस्थमृषिसत्तमं ३ राजो च यन्मयापकृतं मोहादज्ञानादृषिसत्तम प्रसादये त्वां तत्राहं न मे त्वं क्रोद्धुमर्हसि ४ ॥ ॥ ॥

तदेव विवृणोति शूलाग्र इत्यादिना १५ दर्शयन्त स्वानि रूपाणि प्रकाशयन्तः १६ अध्यायः ॥ ततः दोषतः न कमपि दोषिणं कथयामि वस्तुतः तमेव च मया भुज्यते इत्यर्थः
१ ॥ ४ ॥

श्राः १०७

१ शूलेदेहान्तःप्रविष्टस्यशूलभागस्यान्तिकोमूलंचिन्तेःस्मिकैरनिवेदिनी ६ ध्वरतः आचरत्तपस्तपार्थान् ७ अणीशूलाग्रंतेनयुक्तोमांडव्योऽणीमांडव्यः ८ उपालभतगर्हि

क्रः २

एवमुक्तस्ततोराज्ञाप्रसादमकरोन्मुनिः कृतप्रसादंराजातंततःसमवतारयत् १ अवतार्यचशूलाग्रात्तच्छूलंनिश्चकर्षह अशक्नु
वंश्चनिष्क्रष्टुंशूलंमूलेसचिच्छिदे ६ सतथांतर्गतेनैवशूलेनव्यचरन्मुनिः तेनातितपसालोकानविजिग्येदुर्लभान्परैः ७ अणीमांड
व्यइतिचततोलोकेषुगीयते सगत्वासदनंविप्रोधर्मस्यपरमात्मवित् ८ आसनस्थंततोधर्मंदृष्ट्वोपालभतप्रभुः किंनुतदुःकृतंकर्मम
याकृतमजानता ९ यस्येयंफलनिर्वृत्तिरीदृश्यासादितामया शीघ्रमाचक्ष्वमेतत्त्वंपश्यमेतपसोबलं १० धर्मउ च पतंगिकानांपुच्छे
षुत्वयैषीकाप्रवेशिता कर्मणस्तस्यतेप्राप्तंफलमेतत्तपोधन ११ अणीमांडव्यउ च अल्पेपराधेपिमहान्ममदंडस्त्वयाधृतः शूद्रयोनाव
तोधर्ममानुषःसंभविष्यसि १२ मर्यादांस्थापयाम्यद्यलोकेधर्मफलोदयां आचतुर्दशकाद्वर्षान्नभविष्यतिपातकं १३ परतःकुर्वतामेवदो
षएवभविष्यति १३ वैशंपायनउ च एतेनत्वपराधेनशापात्तस्यमहात्मनः धर्मोविदुररूपेणशूद्रयोनावजायत १४ धर्मेचार्थेचकुशलो
लोभक्रोधविवर्जितः दीर्घदर्शीशमपरःकुरूणांचहितेरतः १५ इत्यादिय राणीमांडव्योपाख्याने वैशंपायनउ च तेषुत्रिषुकुमारे षु
षुजातेषुकुरुजांगले कुरवोथकुरुक्षेत्रेत्रयमेतदवर्द्धत १ ऊर्ध्वसस्याभवद्भूमिःसस्यानिरसवंतिच यथर्तुवर्षीपर्जन्योबहुपुष्पफलाद्रुमः

नवान् ९ १४ दीर्घदर्शीसर्वकालपरामर्शीशमपरांतिर्वैरः १५ अथायेणीमांडव्योपाख्यानं तेषुकुरुजांगलेदेशः कुरवःपुरुषाकुरुक्षेत्रेकुरुषुक्षेत्रंस्थानं १ राम० १०७
देशंस्तोतिऊर्ध्वसस्याप्रचुरसस्या २

३ कुरूनसौतिष्मराश्चेति ४ ५ स्थानंसौतितदिति ८ ९ १० ११ १२ विमृद्यपरराष्ट्रस्याअपिसुखायिनोऽत्रैवप्रविष्टाइत्यर्थः १४ १५ १६ १७

वाहनानिप्रहृष्टानिमुदितामृगपक्षिणः गंधवंतिचमाल्यानिरसवंतिफलानिच वणिग्भिश्चान्वकीर्यंतनगराण्यथशिल्पिभिः ३
शूराश्चकृतविद्याश्चसंतश्चसुखिनोभवन् नाभवद्दस्यवः केचिन्नाधर्मरुचयोजनाः प्रदेशेष्वपिराष्ट्राणांकृतंयुगमवर्त्तत ५ धर्मक्रि
यायज्ञशीलाःसत्यव्रतपरायणाः अन्योन्यप्रीतिसंयुक्ताव्यवर्द्धंतप्रजास्तदा ६ मानक्रोधविहीनाश्चनरालोभविवर्जिताः अन्यो
न्यमभ्यनंदंतधर्मोत्तरमवर्त्तत ७ तन्महोदधिवत्पूर्णंनगरंवैव्यरोचत द्वारतोरणनिर्यूहैर्युक्तमभ्रचयोपमैः ८ प्रासादशतसंबा
धंमहेंद्रपुरसंनिभं नदीषुवनखंडेषुवापीपल्वलसानुषु काननेषुचरम्येषुविजह्रुर्मुदिताजना ९ उत्तरैःकुरुभिःसार्द्धंदक्षिणाःकु
रवस्तथा विस्पर्द्धमानाव्यचरंस्तथादेवर्षिचारणैः १० नाभवत्कृपणःकश्चिन्नाभवन्विधवाःस्त्रियः तस्मिन्जनपदेरम्येकुरु
भिर्बहुलीकृते ११ कूपारामसभावाप्योब्राह्मणावसथास्तथा बभूवुःसर्वर्द्धियुतास्तस्मिन्राष्ट्रेसदोत्सवाः १२ भीष्मेणधर्मतोराजन्सर्व
तःपरिरक्षिते बभूवरमणीयश्चचैत्ययूपशतांकितः १३ सदेशःपरराष्ट्राणिविमृद्याभिप्रवर्द्धितः भीष्मेणविहितंराष्ट्रेधर्मचक्र
मवर्त्तत १४ क्रियमाणेषुकृत्येषुकुमाराणांमहात्मनां पौरजानपदाःसर्वेबभूवुःसमुत्सुकाः १५ गृहेषुकुरुमुख्यानांपौराणां
चनराधिप दीयतांभुज्यतांचेतिवाचोश्रूयंतसर्वशः १६ धृतराष्ट्रश्चपांडुश्चविदुरश्चमहामतिः जन्मप्रभृतिभीष्मेणपुत्रवत्प
रिपालिताः १७ ॥ ॥

श्रमः शास्त्राभ्यासः व्यायामो वा न्नुयुद्धाभ्यासः १८ २१ धर्मे च परमं आत्मदर्शनं गतः प्राप्तः अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति याज्ञवल्क्योक्तेः २२ निर्वचनं प्रशं

संस्कारैः संस्कृतास्ते तु व्रताध्ययनसंयुताः श्रमव्यायामकुशलाः समपद्यन्त यौवनं १८ धनुर्वेदे च वेदे च गदायुद्धेसिचर्मणि तथैव गज
शिक्षायां नीतिशास्त्रेषु पारगाः १९ इतिहासपुराणेषु नानाशिक्षासु बोधिताः वेदवेदांगतत्त्वज्ञाः सर्वत्र कृतनिश्चयाः २० पांडुर्धनुषि विक्रांतो
नरेष्वभ्यधिकोभवत् अन्येभ्यो बलवानासीद्धृतराष्ट्रो महीपतिः २१ त्रिषु लोकेषु न त्वासीत्कश्चिद्विदुरसंमितः धर्मनित्यस्तथा राजन् धर्मे च
परमं गतः २२ प्रनष्टं शांतनोर्वंशं समीक्ष्य पुनरुद्धृतं ततो निर्वचनं लोके सर्वराष्ट्रेष्ववर्त्तत २३ वीरसूनां काशिसुते देशानां कुरुजांगलं
सर्वधर्मविदां भीष्मः पुराणां गजसाह्वयं २४ धृतराष्ट्रस्त्वचक्षुष्ट्वाद्राज्यं न प्रत्यपद्यत पारसवत्वाद्विदुरो राजा पांडुर्बभूव ह २५ कदा
चिदथ गांगेयः सर्वनीतिमतां वरः विदुरं धर्मतत्त्वज्ञं वाक्यमाह यथोचितं २६ इत्यादिपर्वणि भीष्मश्च गुरौः समुदितं सम्यगिदं नः प्रथि
तं कुलं अन्यान्पृथिवीपालान्पृथिव्यामधिराज्यभाक् रक्षितं राजभिः पूर्वैर्धर्मविद्भिर्महात्मभिः नोत्सादमगमच्चेदं कदाचिदिह नः कुलं
२ मया च सत्यवत्या च कृष्णेन च महात्मना समवस्थापितं भूयो युष्मासु कुलतंतुषु ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सा २३ २४ पारसवत्वात् शूद्रायां ब्राह्मणाज्जातत्वात् करणोत्पपाठः लक्षणया वा तथा च मनुः शूद्रायां करणो वैश्याद्दिति तन्निर्वचनात् २५ २६ अध्यायः गुरौः ३

यादवी यादवस्य शूरस्य कुंतिभोजस्य वा अपत्यं ५ १० प्रेषयामास दूतमिति शेषः ११ १२ दित्सितं दातुमिष्टं १३ बहुगुणं बहुधा गुणितं १४ नाभ्यसूयां यतुः अभिभ

तच्चैतद्वर्द्धते भूयः कुलं सागरवद्यथा तथा मया विधातव्यं त्वया चैव न संशयः ४ श्रूयते यादवी कन्या स्वनुरूपा कुलस्य नः सुबलस्यात्मजा चै
वं तथा मद्रेश्वरस्य च ५ कुलीना रूपवत्यश्च ताः कन्याः पुत्र सर्वशः ३ उचिताश्चैव संबंधे तेस्माकं क्षत्रियर्षभाः ६ मन्ये वरयितव्यास्ता इत्यहं धी
मतां वर संतानार्थं कुलस्यास्य यद्वा विदुर मन्यसे विदुर उवाच भवान्पिता भवान्माता भवान्नः परमो गुरुः तस्मात्स्वयं कुलस्यास्य विचार्य कु
रु यद्धितं ८ वैशंपायन उवाच अथ शुश्राव विप्रेभ्यो गांधारीं सुबलात्मजां आराध्य वरदं देवं भगनेत्रहरं हरं ९ गांधारी किल पुत्राणां शतं ले
भे वरं शुभा इति श्रुत्वा च तत्त्वेन भीष्मः कुरुपितामहः १० ततो गांधारराजस्य प्रेषयामास भारत अचक्षुरिति तत्रासीत्सुबलस्य विचारणा ११ कु
लं ख्यातिं च वृत्तं च बुद्ध्या तु प्रसमीक्ष्य सः ददौ तां धृतराष्ट्राय गांधारीं धर्मचारिणीं १२ गांधारी त्वथ शुश्राव धृतराष्ट्रमचक्षुषं आत्मानं दित्सि
तं चास्मै पित्रा मात्रा च भारत ततः सा पटमादाय कृत्वा बहुगुणं तदा बबंध नेत्रे स्वे राजन्पतिव्रतपरायणा १४ नाभ्यसूयां पतिमहमित्येवं कृत
निश्चया ततो गांधारराजस्य पुत्रः शकुनिरभ्ययात् स्वसारं वयसा लक्ष्म्या युक्तामादाय कौरवान् तां तदा धृतराष्ट्राय ददौ परमसत्कृतः भीष्मस्या
नुमते चैव विवाहं समकारयत् १६

वं न कुर्यां १५ १६ ॥ ॥ ॥ ॥ ॥

आ:
२०९

१७ नान्वकीर्त्तयत् नप्रसुन्नरं[illegible]रदन्नवती १८ १९ अग्रंअपमजांअग्नेजन्मातः पूर्वंप्रतिज्ञायमयाप्रथमपत्यंतुभ्यंदेयमितिप्रतिश्रुत्य २० २१ यमितिगूढं[illegible]तिष्ठ्यांवहिः

दत्वासमभगिनीवीरोयथार्हंचपरिच्छदं पुनरायात्स्वनगरंभीष्मेणाप्रतिपूजितः २० गांधार्यपिवरारोहाशीलाचारविचेष्टितैः तुष्टिंकुरूणांसर्वेषां
जनयामासभारत वृत्तेनाराधयत्तान्सर्वान्गुरून्पतिपरायणा वाचापिपुरुषानन्यान्सुव्रतानान्वकीर्त्तयत् १९ वैशं शूरोनामयदुश्रेष्ठोव
सुदेवपिताभवत् तस्यकन्यापृथानामरूपेणाप्रतिमाभुवि पितृष्वस्रीयायसतामनपत्यायभारत अग्न्यामग्रेप्रतिज्ञायस्वस्यापत्यस्यसत्यवाक्
अग्रजामथतांकन्यांशूरोनुग्राहकांक्षिणे प्रददौकुंतिभोजायसखासख्येमहात्मने नियुक्तासापितुर्गेहेब्राह्मणातिथिपूजने उग्रंपर्यव
रक्षत्रेब्राह्मणांशंसितव्रतं २२ निगूढनिश्चयंधर्मेयंतंदुर्वाससंविदुः तमुग्रंसंशितात्मानंसर्वयत्नैरतोषयत् २३ तस्यैसप्रददौमंत्रमापद्धर्मान्व
वेक्षया अभिचाराभिसंयुक्तमब्रवीच्चैवतांमुनिः २४ यंयंदेवंत्वमेतेनमंत्रेणावाहयिष्यसि तस्यतस्यप्रभावेनतवपुत्रोभविष्यति २५ तथोक्ता
सातुविप्रेणाकुंतीकौतूहलान्विता कन्यासतीदेवमर्कमाजुहावयशस्विनी २६ साददर्शतमायांतंभास्करंलोकभावनं विस्मिताचानवद्यांगी दृ
ष्ट्वातन्महदद्भुतं २७ तांसमासाद्यदेवस्तुविवस्वानिदमब्रवीत् अयमस्म्यसितापांगी ब्रूहिकिंकरवाणिते २८ कुंत्यु च कश्चिन्मेब्राह्म
णः प्रादाद्वरंविद्यांचशत्रुहन् तद्विजिज्ञासयाह्वानंकृतवत्यस्मितेविभो २९ एतस्मिन्नपराधेत्वांशिरसाहंप्रसादये योषितोहिसदारक्ष्याः
स्वपराद्धापिनित्यशः ३०

क्रौर्यदर्शनात् २३ आपद्धर्मास्त्ववेक्षयाभाविसंतानप्रतिबंधस्यानागतावेक्षणेनाभिचारः वशीकरणादिसंयुक्तं ३० ॥ छ ॥ ॥ राम॰
२०९

३१ मद्यंनम ३२ ३९ गूहमानाछादयंती अपचारं अपराधं ४० वसुनाकुंडलकवचाभ्यां सह इति वसुषेणः ४१ ४२ आपृष्ठतापात् आमध्यान्हात् सूर्यः ४३ ४५

सूर्यंत च वेदाहं सर्वमेवैतदघदुर्वासा वरं ददौ संन्नप्रमयमेवेह क्रियतां संगमो मया ३१ अमोघं दर्शनं मह्यमाहूतश्चास्मि ते शुभे वृथाह्वा
नेपि ते भीरु दोषः स्यान्नात्र संशयः वैशं एवमुक्त्वा बहुविधं सान्त्वपूर्वं विवस्वता सा तु नैच्छद्वरारोहा कन्याहमिति भारत ३३ बंधुपक्षभयाद्भी
ता लज्जया च यशस्विनी तामर्कः पुनरेवेदमब्रवीद्भरतर्षभ ३४ मत्प्रसादान्न ते राज्ञि भविता दोष इत्युत एवमुक्त्वा स भगवान्कुंतिराजसुतां
तदा प्रकाशकर्त्ता तपनः संबभूव तया सह ३५ तत्र वीरः समभवत्सर्वशस्त्रभृतां वरः आमुक्तकवचः श्रीमान्देवगर्भः श्रियावृतः ३६ सह
जं कवचं बिभ्रत्कुंडलोद्योतिताननः अजायत सुतः कर्णः सर्वलोकेषु विश्रुतः ३७ प्रादाच्च तस्यै कन्यात्वं पुनः स परमद्युतिः दत्वा च त
पतां श्रेष्ठो दिवमाचक्रमे ततः ३८ दृष्ट्वा कुमारं जातं सा वार्ष्णेयी दीनमानसा एकाग्रा चिंतयामास किंकृत्वा सुकृतं भवेत् ३९ गूह
मानापचारं सा बंधुपक्षभयात्तदा उत्ससर्ज कुमारं तं जले कुंती महाबलं ४० तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः पुत्रत्वे कल्पयामास सभा
र्यः सूतनंदनः ४१ नामधेयं च चक्राते तस्य बालस्य तावुभौ वसुना सह जातोयं वसुषेणो भवत्विति ४२ स वर्धमानो बलवान्सर्वास्त्रेषूद्यतो
भवत् आपृष्ठतापादादित्यमुपातिष्ठत वीर्यवान् ४३ तस्मिन्काले जपतस्तं वीरस्य धीमतः नादेयं ब्राह्मणेष्वासीत्किंचिद्वसु महीतले
४४ तमिंद्रो ब्राह्मणो भूत्वा भिक्षार्थी समुपागत कवचं प्रार्थयामास फाल्गुनस्य हितेरतः ४५ ॥ ॥ ॥ ॥ ॥ ॥

स्प२

कर्णइतिसहजस्यकवचस्यउत्कर्त्तनात्।विशेषःकर्त्तनेनेतिविकर्त्तनःसएववैकर्त्तनः [illegible] स्वार्थेतद्धितः ७९ विकर्त्तनस्यसूर्यस्यापत्यत्वाद्वा अध्यायःसत्व धर्मारामा

स्वशरीरात्समुत्कृत्यकवचंसनिसर्गजं विप्ररूपायशक्रायददौकर्णःकृतांजलिः ७६ प्रतिगृह्यतुदेवेशस्तत्कृष्टेनास्यकर्मणा ददौ
शक्तिंसुरपतिर्वीक्ष्यचेदमुवाचह ७७ देवासुरमनुष्याणांगंधर्वोरगरक्षसां यमेकंजेतुमिच्छेथाःसोनयानभविष्यति ७८ प्राग्नामतस्य
कथितंवसुषेणइतिक्षितौ कर्णोवैकर्त्तनस्तेनकर्म्मणातेनसोभवत् ७९ इत्यादिपर्वणिसंभवे वेशं सत्वरूपगुणोपेताधर्मारामामहाव्रता
दुहिताकुंतिभोजस्यपृथापृथुललोचना १ तांतुतेजस्विनींकन्यांरूपयौवनशालिनीं नाव्रन्पार्थिवाःकेचिदतीवस्त्रीगुणैर्युतां २ ततःसा
कुंतिभोजेनराज्ञाहूयनराधिपान् पित्रास्वयंवरेदत्तादुहितराजसत्तम ३ ततःसारंगमध्यस्थंतेषांराज्ञांमनस्विनी ददर्शराजशार्दूलंपांडुंभ
रतसत्तमं ४ सिंहदर्पंमहोरस्कंवृषभाक्षंमहाबलं आदित्यमिवसर्वेषांराज्ञांप्रच्छाद्यवैप्रभाः तिष्ठंतराजसमितौपुरंदरमिवापरं ५ तंदृष्ट्वा
सानवद्यांगीकुंतिभोजसुताशुभा पांडुंनरवरंरंगेहृदयेनाकुलाभवत् ६ ततःकामपरीतांगीसकृत्प्रचलमानसा व्रीडमानास्रजंकुंतीराज्ञः
स्कंधेसमासजत् ७ ७॥

धर्मनिष्ठाः ७ श्रीरामोजयति ॥ ॥ ॥

तंनिशम्यवृतंपांडुंकुंत्यासर्वेनराधिपाः यथागतंसमाजग्मुर्गजैरश्वैरथैस्तथा ९ ततस्तस्याः पितारा जन्विवाहमकरोत्प्रभुः सतयाकुंतिभो
जस्यदुहित्राकुरुनंदन युयुजेमितसौभाग्यः पौलोम्यामघवानिव कुंत्यांपांडुंचराजेंद्रकुंतिभोजोमहीपतिः १० कृत्वोद्वाहंतदातंतुनानावसु
भिरर्चितं स्वपुरंप्रेषयामाससराजाकुरुसत्तम ११ ततोबलेनमहतानानाध्वजपताकिना स्तूयमानःसवाशीर्भिर्ब्राह्मणैश्चमहर्षिभिः
१२ संप्राप्यनगरंराजापांडुःकौरवनंदनः प्रवेशयत्ततोभार्यांकुंतींस्वभवनेप्रभुः १३ इत्यादिपर्वणिकुंतीविवाहे वैशं ततःशांतनवो
भीष्मोराज्ञःपांडोर्यशस्विनः विवाहस्यापरस्यार्थेचकारमतिमान्मतिं १ सोमात्यैःस्थविरैसार्द्धंब्राह्मणैश्चमहर्षिभिः बलेनच
तुरंगेणाययौमद्रपतेःपुरं २ तमागतमभिश्रुत्वावीर्यवान्वाह्लीकपुंगवः प्रत्युद्गम्यार्चयित्वाचपुरंप्रावेशयन्नृपः ३ दत्वातस्यासनंशुभ्रं
पाद्यमर्घंतथैवच मधुपर्कंचमद्रेशःपप्रछागमनेर्थितां ४ तंभीष्मःप्रत्युवाचमद्रराजंकुरूद्वहः आगतंमांविजानीहिकन्यार्थिन
मरिंदम ५ श्रूयतेभवतःसाध्वीस्वसामाद्रीयशस्विनी तामहंवरयिष्यामिपांडोरर्थेयशस्विनीं ६ युक्तरूपोहिसंबंधेत्वंनोराजन्व
यंतव एतत्संचिंत्यमद्रेशगृहाणास्मान्यथाविधि ७ तमेवंवादिनंभीष्मंप्रत्यभाषतमद्रपः नहिमेन्योवरस्त्वत्तःश्रेयानितिमति
र्मम ८ ॥ ॥

आ:
२११

यद्यपि कन्याशुल्कग्रहणं आसुरे विवाहे दृष्टं तथापि कुलधर्मत्वाद्परिहार्यमित्याह पूर्वैरिति ९ ११ धर्मएषः आर्षेपि विवाहे कन्याशुल्कत्वेन गोमिथुनग्रहणदर्शनात् १२ न

पूर्वैः प्रवर्त्तितं किंचित्कुलेस्मिन्नृपसत्तमैः साधु वा यदि वासाधु तन्नातिक्रांतुमुत्सहे ९ व्यक्तं तद्भवतश्चापि विदितं नात्र संशयः न च युक्तं तथा
वक्तुं भवान्देहीति सत्तम १० कुलधर्मः स नो वीर प्रमाणं परमं च तत् तेन त्वां न ब्रवीम्येतदसंदिग्धं वचोरिहन् ११ तं भीष्मः प्रत्युवाचेदं मद्र
राजं जनाधिपः धर्मएष परो राजन्स्वयमुक्तः स्वयंभुवा १२ नात्र कश्चन दोषोस्ति पूर्वैर्विधिरयं कृतः विदितेयं च ते शल्य मर्यादा साधुसंमता १३
इत्युक्त्वा स महातेजाः शातकुंभं कृताकृतं रत्नानि च विचित्राणि शल्यायादात्सहस्रशः १४ गजानश्वान्रथांश्चैव वासांस्याभरणानि च मणि
मुक्ताप्रवालं च गांगेयो व्यसृजच्छुभं १५ तत्प्रगृह्य धनं सर्वं शल्यः संप्रीतमानसः ददौ तां समलंकृत्य स्वसारं कौरवर्षभे १६ स तां माद्रीमुपा
दाय भीष्मः सागरगासुतः आजगाम पुरीं धीमान्प्रविष्टो गजसाह्वयं ततः प्रशस्तेहनि प्राप्ते मुहूर्ते साधुसंमते जग्राह विधिवत्पाणिं माद्र्याः ॥

फाल्गुनेराधेप४ १७

शातकुंभकाचनं कृताकृतं घटितमघटितं च १४ व्य गम०

[illegible]पाचशिष्टाचारत्वात्स्वयमपि धर्मः स्वयंभुवा वेदेनैवोक्तः इति सेयं एतेन विगीतोपि कुलाचारो न त्याज्य इति दर्शितं १३ २११

सृजत् प्रादात् १५ १६ १७ ॥

२० त्रिदशाःत्रिंशत् २१ २४ आगस्कृतः चोरप्रायाः पर्वताश्रयिन्वात् २५ ३० कुरुकर्मसुयोजिताः कुरुणांदासभूताः ३१ ३२ ३३ ॥

[illegible]ततोविवाहेनिर्वृत्तेसराजाकुरुनंदनः स्थापयामासतांभार्यांशुभेवेश्मनिभाविनी १९ सतास्यांचचरन्सार्द्धंभार्याभ्यांराजस
त्तमः कुंत्यामाद्र्याचराजेंद्रोयथाकामंयथासुखं २० ततःसकौरवोराजाविहृत्यात्रिदशानिशाः जिगीषयामहींपांडुर्निरक्रामत्पुरात्प्र
भो २१ सभीष्मप्रमुखान्वृद्धानभिवाद्यप्रणम्यच धृतराष्ट्रंचकौरव्यंतथान्यान्कुरुसत्तमान् २२ आमंत्र्यप्रययौराजातैश्चैवाभ्यनुमोदितः
मंगलाचारयुक्ताभिराशीर्भिरभिनंदितः २३ गजवाजिरथौघेनबलेनमहतागमत् सराजादेवगर्भाभोविजिगीषुर्वसुंधरां हृष्टपुष्टबलैः
प्रायात्पांडुःशत्रूननेकशः २४ पूर्वमागस्कृतोगत्वादशार्णाःसमरेजिताः पांडुनानरसिंहेनकौरवाणांयशोभृता २५ ततःसेनामु
पादायपांडुर्नानाविधध्वजां प्रभूतहस्त्यश्वयुतांपदातिरथसंकुलां २६ आगस्कारीमहीपानांबहूनांबलदर्पितः गोप्तामगधराष्ट्रस्यदी
र्घोराजगृहेहतः २७ ततःकोशंसमादायवाहनानिचभूरिशः पांडुनामिथिलांगत्वाविदेहाःसमरेजिताः २८ तथाकाशिषुसुह्मेषुपु
ण्ड्रेषुचनरर्षभ स्वबाहुबलवीर्येणाकुरूणामकरोद्यशः २९ तंशरौघमहाज्वालंशस्त्रार्चिषमरिंदमं पांडुपावकमासाद्यव्यदह्यंतप
नराधिपाः ३० तेससेनाःससेनेनविध्वंसितबलान्नृपाः पांडुनावशगाःकृत्वाकुरुकर्मसुयोजिताः ३१ तेनतेनिर्जिताःसर्वेपृथि
व्यांसर्वपार्थिवाः तमेकंमेनिरेशूरंदेवेष्विवपुरंदरं ३२ तंकृतांजलयःसर्वेप्रणतावसुधाधिपाः उपाजग्मुर्धनंगृह्यरत्नानिवि
विधानिच ३३ ॥

आ॰
२१२

नागपुराधिपः हस्तिनापुरेशः ३४ ३७ प्रतीतमनसो निःकल्मषचित्ताः अनतस्वहस्ताः ३८ नदूरमिव अदूरमिव जयोत्साहेन मार्गश्रमाभावात् ३९ ४०

मणिमुक्ताप्रवालं च सुवर्णं रजतं बहु गोरत्नान्यश्वरत्नानि रथरत्नानि कुंजराः ३७ खरोष्ट्रमहिषीश्चैव यच्च किंचिदजावि
कं कंबलानि चरत्नानि रांकवास्तरणानि च तत्सर्वं प्रतिजग्राह राजा नागपुराधिपः तदा दापयदौ पांडुः पुनर्मुदितवाहनः
हर्षयिष्यन्स्वराष्ट्राणि पुरं च गजसाह्वयं शांतनो राजसिंहस्य भरतस्य च धीमतः प्रनष्टः कीर्तिजः शब्दः पांडुना पुनराहृतः ये पुरा
कुरुराष्ट्राणि जह्रुः कुरुधनानि च ते नागपुरसिंहेन पांडुना करदीकृताः इत्यभाषंत राजानो राजामात्याश्च संगताः प्रतीतमनसो हृष्टाः
पौरजानपदैः सह प्रत्युद्ययुस्तं संप्राप्तं सर्वे भीष्मपुरोगमाः तेन दूरमिवाध्वानं गत्वा नागपुरालयात् आवृतं ददृशुर्हृष्टा लोकं बहुवि
धैर्धनैः नानायानसमानीतै रत्नैरुच्चावचैस्तदा ४० हस्त्यश्वरथरत्नैश्च गोभिरुष्ट्रैरथाविभिः नांतं ददृशुरासाद्य भीष्मेण सह कौ
रवाः ४१ सोभिवाद्य पितुः पादौ कौसल्यानंदिवर्द्धनः यथार्हं मानयामास पौरजानपदानपि ४२ प्रमृद्य पर राष्ट्राणि कृतार्थं पुनरा
गतं पुत्रमाश्लिष्य भीष्मस्तु हर्षादश्रूण्यवर्तयत् सतूर्यशतशंखानां भेरीणां च महास्वनैः हर्षयन्सर्वशः पौरान्विवेश गजसाह्वयं
४४ इत्यादिपर्वणि संभवे वैशं धृतराष्ट्राभ्यनुज्ञातः स्वबाहुविजितं धनं भीष्माय सत्यवत्यै च मात्रे चोपजहार सः १ ॥

४१ ४२ ४३ ४४ अध्यायः श्लोकाः १ ॥ ४ ॥ ॥ ॥ ॥ ॥ ४ ॥ ॥ ॥

राम॰
२१२

१ ३ अश्वमेधशतैस्तुल्यैः। महामखैः पंचमहायज्ञैः गार्हस्थसम्श्रौतपदेश्वनाधिकारात ५ १४ ~~[illegible]~~ २ पारसवीव्याख्यातरूपाब्राह्मणेनशूद्रायां

विदुरायसवैपांडुः प्रेषयामासतद्धनं सुहृदश्चापिधर्मात्माधनेनसमतर्पयत् २ ततः सत्यवतीभीष्मः कौशल्यांचयशस्विनी शुभैः पांडु
जितैरर्थैस्तोषयामासभारत ३ ननंदमाताकौशल्यातमप्रतिमतेजसं जयंतमिवपौलोमीपरिष्वज्यनरर्षभं ४ तस्यवीरस्यविक्रांतैः सह
स्रशतदक्षिणैः अश्वमेधशतैरीजेधृतराष्ट्रोमहामखैः ५ संप्रयुक्तस्तुकुंत्याचमाद्र्याचभरतर्षभ जितंतंद्रिस्तदापांडुर्बभूववनगोचरः ६ हित्वा
प्रासादनिलयंशुभानिशयनानिच आरण्यनित्यः सततंबभूवमृगयापरः ७ सचान्दक्षिणंपार्श्वंरम्यंहिमवतोगिरेः उवाससगिरिपृष्ठेषुमहाशालव
नेषु च ८ राजकुंत्याचमाद्र्याचपांडुः सहवनेवसन् करेणोरिवमध्यस्थः श्रीमान्पौरंदरोगजः ९ भारतंसहभार्याभ्यांबाणखड्गधनुर्धरं विचित्र
कवचंवीरंपरमास्त्रविदंनृपं देवोयमित्यमन्यंतचरंतंवनवासिनः तस्यकामांश्चभोगांश्चनराणितमतंद्रिताः उपजह्रुर्वनांतेषुधृतराष्ट्रेणचोदि
ताः ११ अथपारशवींकन्यांदेवकस्यमहीपतेः रूपयौवनसंपन्नांसशुश्रावापगासुतः १२ ततस्तुवरयित्वातामानीयभरतर्षभ विवाहंकारया
मासविदुरस्यमहामतेः १३ तस्यांचोत्पादयामासविदुरः कुरुनंदन पुत्रान्विनयसंपन्नानात्मनः सदृशान्गुणैः १४ इत्यादिपर्वणिसंभवे वै
शं ततः पुत्रशतंजज्ञेगांधार्यांजनमेजय धृतराष्ट्रस्यवैश्यायामेकश्चापिशतात्परः १ पांडोः कुंत्यांचमाद्र्यांचपुत्राः पंचमहारथाः देवेभ्यः स
मपद्यंतसंतानायकुलस्यवै २

जातं १२।११३।११४ अध्यायः ततः इति

आ०
२१३

३ ६ ११ लोहाष्ठीलालोहमयीगंडिकातद्वत्संहताकठिना १२ ॥

जनमेजय उवाच कथंपुत्रशतंजज्ञेगांधार्यांद्विजसत्तम किंयताचैवकालेनतेषामायुश्चकिंपरं ३ कथंचैकःसवैश्यायांधृतराष्ट्रसुतोभवत् क
थंचसदृशींभार्यांगांधारींधर्मचारिणीं ४ आनुकूल्येवर्त्तमानांधृतराष्ट्रोभ्यवर्त्तत। कथंचशप्तस्यसतःपांडोस्तेनमहात्मना ५ समुत्पन्नादैवते
भ्यःपुत्राःपंचमहारथाः एतद्विद्वन्यथान्यायंविस्तरेणतपोधनः कथयस्वनमेतृप्तिःकथ्यमानेषुबंधुषु ६ वैशं क्षुच्छ्रमाभिपरिग्लानंद्वैपाय
नमुपस्थितं तोषयामासगांधारीव्याससस्मैवरंददौ ७ सावव्रेसदृशंभर्तुःपुत्राणांशतमात्मनः ततःकालेनसागर्भंधृतराष्ट्रादथाग्रहीत् ८
संवत्सरद्वयंतंतुगांधारीगर्भमाहितं अप्रजाधारयामासततस्तांदुःखमाविशत् ९ श्रुत्वाकुंतीसुतंजातंबालार्कसमतेजसं उदरस्यात्मनः
स्थैर्यमुपालभ्यान्वचिंतयत् १० अज्ञातंधृतराष्ट्रस्ययत्नेनमहतातनः सोदरंघातयामासगांधारीदुःखमूर्छिता ११ ततोजज्ञेमांसपेशी
लोहाष्ठीलेवसंहता द्विवर्षसंभृताकुक्षौतामुत्स्रष्टुंप्रचक्रमे १२ अथद्वैपायनोज्ञात्वात्वरितःसमुपागमत् तांसमांसमयींपेशींददर्शज
पतांवरः १३ ततोब्रवीत्सौबलेयींकिमिदंतेचिकीर्षितं साचात्मनोमतंसत्यंशशंसपरमर्षये १४ गांधार्युवाच ज्येष्ठंकुंतीसुतंजातंश्रु
त्वारविसमप्रभं दुःखेनपरमेणोदरंघातितंमया १५ शतंचकिलपुत्राणांवितीर्णंमेत्वयापुरा इयंचमेमांसपेशीजातापुत्रशतायवै १६
व्यास उवाच एवमेतत्सौबलेयिनैतज्जात्वन्यथाभवेत् वितथंनोक्तपूर्वंमेस्वैरेष्वपिकुतोन्यथा १७ ॥ छ ॥ ॥ ॥

राम०
२१३

२० अवदधेस्वनवती २१ २२ २३ २४ रुरावचननादचाव्यक्तमव्यक्तंचशब्दंखरसदृशमेवाकरोत् २५ २६ २७ २८ २९ ३०

घृतपूर्णंकुंडशतंक्षिप्रमेवविधीयतांसुगुप्तेषुचदेशेषुरक्षाचैवविधीयतां शीताभिरद्भिरष्ठीलामिमांचपरिसिंचयः १८ वैशं सासिच्यमा
नाष्ठीलाबभूवशतधातदा अंगुष्ठपर्वमात्राणांगर्भाणांपृथगेवतु १९ एकाधिकशतंपूर्णंयथायोगंविशांपते मांसपेश्यास्तदाराजन्क्रम
शःकालपर्ययात् २० ततस्तांस्तेषुकुंडेषुगर्भानवदधेतदा स्वनुगुप्तेषुदेशेषुरक्षांविव्यदधत्ततः २१ शशंसचैवभगवान्कालेनैतावतापुनः उ
द्घट्टनीयान्येतानिकुंडानीतिचसौबलीं २२ इत्युक्त्वाभगवान्व्यासस्तथाप्रतिविधायच जगामतपसेधीमान्हिमवंतंशिलोच्चयं २३ जज्ञेक्रमेण
चैतेनतेषांदुर्योधनोनृपः जन्मतस्तुप्रमाणेनज्येष्ठोराजायुधिष्ठिरः २४ तदाख्यातंतुभीष्मायविदुरायचधीमते यस्मिन्नहनिदुर्द्धर्षोजज्ञेदुर्योध
नस्तदा २५ तस्मिन्नेवमहाबाहुर्जज्ञेभीमोपिवीर्यवान् सजातमात्रएवाथधृतराष्ट्रसुतोनृप रासभारावसदृशंरुरावचननादचतंखराःप्रत्यभाषंत
गृध्रगोमायुवायसाः वाताश्चप्रववुश्चापिदिग्दाहश्चाभवत्तदा २६ ततस्तुभीतवद्राजाधृतराष्ट्रोब्रवीदिदं समानीयबहून्विप्रान्भीष्मंविदुरमेव
द्वा२ च २७ अन्यांश्चसुहृदोराजन्कुरून्सर्वांस्तथैवच युधिष्ठिरोराजपुत्रोज्येष्ठोनःकुलवर्द्धनः २८ प्राप्तःस्वगुणतोराज्यंनतस्मिन्वाच्यमस्तिनः अयं
त्वनंतरस्तस्मादपिराजाभविष्यति एतद्विब्रूततेमेतथ्यंयदत्रभविताध्रुवं २९ वाक्यस्यैतस्यनिधनेदिक्षुसर्वासुभारत क्रव्यादाःप्राणदन्घोराःशिवा
श्चाशिवशंसिनः ३०

आः ११४

३८ करणश्चकरणः क्षत्रियाद्वैश्यायांजातस्तातनतुवैश्यातशूद्रायां ३९ ४ अध्यायः श्लतः ३

लक्षयित्वानिमित्तानितानिघोराणिसर्वशः तेब्रुवनब्राह्मणाराजनविदुरश्चमहामतिः ३१ यथेमानिनिमित्तानिघोराणिमनुजाधिप उत्थितानि
सुतेजातेज्येष्ठेतेपुरुषर्षभ व्यक्तंकुलांतकरणोभवितैषसुतस्तव तस्यशांतिःपरित्यागेगुप्तावपनयोमहान् ३३ शतमेकोनमप्यस्तुपुत्राणांतेम
हीपते त्यजैनमेकेशांतिंचेत्कुलस्येछसिभारत ३४ एकेनवैकुरुक्षेमंकुलस्यजगतस्तथा त्यजेदेकंकुलस्यार्थेग्रामस्यार्थेकुलंत्यजेत् ग्रामंजन
पदस्यार्थेआत्मार्थेपृथिवींत्यजेत् ३५ सतथाविदुरेणोक्तस्तैश्चसर्वैर्द्विजोत्तमैः नचकारतथाराजापुत्रस्नेहसमन्वितः ३६ ततःपुत्रशतंपूर्णंधृ
तराष्ट्रस्यपार्थिव मासमात्रेणसंजज्ञेकन्याचैकाशताधिका ३७ गांधार्यांक्लिश्यमानायामुदरेणविवर्द्धता धृतराष्ट्रंमहाराजवैश्यापर्यचरत्किल
३८ तस्मिन्संवत्सरेराजनधृतराष्ट्रान्महायशाः जज्ञेधीमांस्ततस्तस्यांयुयुत्सुःकरणोनृपः ३९ एवंपुत्रशतंजज्ञेधृतराष्ट्रस्यधीमतः महारथा
नांवीराणांकन्याचैकाशताधिका ४० युयुत्सुश्चमहातेजावैश्यापुत्रःप्रतापवान् इत्यादिपर्वणिसंभवः जनमेजयउ च धृतराष्ट्रस्यपु
त्राणामादितःकथितंत्वया ऋषेःप्रसादात्पुत्राणांशतंनचकन्याप्रकीर्तिता १ वैश्यापुत्रोयुयुत्सुश्चकन्याचैकाशताधिका गांधारराजदुहिताशत
पुत्रेतिचानघ २ उक्तामहर्षिणातेनव्यासेनामिततेजसा कथंत्विदानींभगवन्कन्यांत्वंमनुब्रवीषिमे २ ३ २ ४ ॥

राम॰ ११४

नप्रजाःसन्तिप्रजामान्मनोनेच्छतिसर्वप्रातिपदिकेभ्यःकाचिल्लालसायांसुगसुकाविति वार्त्तिकात्सुगागमः ४ १० अश्ववाहः दौहित्रज्ञानपिलोकानपिलोकानप्राप्स्य

पुरेभागशतंपेशीकृतातेनमहर्षिणा नप्रजाःसन्तिचेद्भूयःसौबलेयीकथंचन ४ कथंतुसंभवस्तस्यादुःशलायावदस्वमे यथावद्विह वि
प्रर्षपरंमेत्रकुतूहलं ५ वैशं साध्वयंप्रश्नउद्दिष्टःपांडवेयब्रवीमिते तांमांसपेशीभगवान्स्वयमेवमहातपाः शीताभिरद्भिरासिच्यभागंभागमकल्पय
त् ६ योयथाकल्पितोभागस्तंतंधात्र्यातथान्टपा घृतपूर्णेषुकुंभेषुएकैकंप्राक्षिपत्तदा ७ एतस्मिन्नंतरेसाध्वीगांधारीसुदृढव्रता दुहितुःस्नेह
संयोगमनुध्यायवरांगना ८ मनसाचिंतयद्देवीएतत्पुत्रशतंममभविष्यतिनसंदेहोनब्रवीत्यन्यथामुनिः ९ ममेयंपरमातुष्टिर्दुहितामेभवेद्यदि ए
काशताधिकाबालाभविष्यतिकनीयसी १० ततोदौहित्रजाल्लोकादबाह्योसौपतिर्मम अधिकाकिलनारीणांप्रीतिर्जामातृजाभवेत् ११
यदिनाममममापिस्याद्दुहितैकाशताधिका कृतकृत्याभवेयंवैपुत्रदौहित्रसंवृता १२ यदिसत्यंतपस्तप्तंदत्तंवाप्यथवाहुतं गुरवस्तोषितावापि
तथास्तुदुहितामम १३ एतस्मिन्नेवकालेतुकृष्णद्वैपायनःस्वयं व्यभजत्सतदापेशींभगवानृषिसत्तमः गणयित्वाशतंपूर्णमंशानामाहसौ
बली १४ व्यासउ च पूर्णंपुत्रशतंत्वेतन्नमिथ्यावागुदाहृता दौहित्रयोगायभागएकःशिष्टःशतात्परः १५ एषातेसुभगाकन्याभविष्यति
यथेप्सिता ततोन्यंघृतकुंभंचसमानाय्यमहातपाः १६ ॥

तीसर्पः ११ १६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ४ ॥ ४ ॥ ॥ ॥

आ॰ १८ अध्यायः श्लोकाः १४ १४ १४ १४ ॥
२१५

चित्रा॰

नंवापि प्राक्षिपत्तत्र कन्याभागं तपोधनाः एतत्ते कथितं राजन् दुःशलाजन्म भारत ब्रूहि राजेंद्र किं भूयो वर्णयिष्यामि तेनघ १८ इत्या
दिपर्वणि संभवे जनमेजय उ॰ च ज्येष्ठानुज्येष्ठतां तेषां नामानि च पृथक् पृथक् धृतराष्ट्रस्य पुत्राणामानुपूर्व्या प्रकीर्त्तय १ वैशं॰ दुर्यो
धनो युयुत्सुश्च राजन् दुःशासनस्तथा दुःसहो दुःशलश्चैव जलसंधः समः सहः विंदानुविंदौ दुर्द्धर्षः सुबाहुर्दुःप्रधर्षणः दुर्मर्षणो दुर्मुखश्च
क दुष्[illegible]ः कर्ण एव च ३ विविंशतिर्विकर्णश्च शलः सत्वः सुलोचनः चित्रोपचित्रौ क्षेमश्चाहचित्रः शरासनः दुर्मदो दुर्विगाहश्च विवित्सुर्विक
टाननः ऊर्णनाभः सुनाभश्च तथा नंदोपनंदकौ ५ चित्रबाणश्चित्रवर्मा सुवर्मा दुर्विमोचनः अयोबाहुर्महाबाहुश्चित्रांगश्चित्रकुंड
लः भीमवेगो भीमबलो बलाकी बलवर्द्धनः उग्रायुधः सुषेणश्च कुंडधारो महोदरः ७ चित्रायुधो निषंगी च पाशी वृंदारकस्तथा दृढव
र्मा दृढक्षत्रः सोमकीर्त्तिरनूदरः दृढसंधो जरासंधः सत्यसंधः सहस्रवाक् उग्रश्रवा उग्रसेनः सेनानीर्दुष्पराजयः ९ अपराजितः कुंडशायी
विशालाक्षो दुराधरः दृढहस्तः सुहस्तश्च वातवेगसुवर्चसौ आदित्यकेतुर्बह्वाशी नागदत्तोग्रयाय्यपि कवची क्राथ कुंडी च [illegible]कुंडधारो
धनुर्द्धरः ११ उग्रभीमरथौ वीरौ वीरबाहुरलोलुपः अभयो रौद्रकर्मा च तथा दृढरथाश्रयः अनाधृष्यः कुंडभेदी विरावी चित्रकुंडलः प्र
मथश्च प्रमाथी च दीर्घरोमश्च वीर्यवान् १२ दीर्घबाहुर्महाबाहुर्व्यूढोरः कनकध्वजः कुंडाशी विरजाश्चैव दुःशला च शताधिका १४ ॥ राम॰
२१२

१५१ अध्यायः कथितो । आर्षः ऋषिप्रसादहेतुकः अमनुष्येषु दृष्टः युगपद्बहूनां जननात् १८ ८ कामक्रोधाहता अपि मूढाः पापाचारस्वभावाईदृशानि नृशंसानि वीभ

इति पुत्रशतं राजन् कन्या चैव शताधिका नामधेयानुपूर्व्येण विद्धि जन्मक्रमं नृप १५ सर्वे त्वतिरथाः शूराः सर्वे युद्धविशारदाः सर्वे वेदविद
श्चैव सर्वे सर्वास्त्रकोविदाः १६ सर्वेषामनुरूपाश्च कृता दारा महीपते धृतराष्ट्रेण समये परीक्ष्य विधिवन्नृपः १७ दुःशलां चापि समये धृतराष्ट्रो
नराधिपः जयद्रथाय प्रददौ विधिना भरतर्षभ १८ इत्यादिपर्वणि संभवे जनमेजय उ च कथितो धार्तराष्ट्राणामार्षः संभवस्त्वमः अमनुष्या
मनुष्याणां भवता ब्रह्मवादिना १ नामधेयानि चाप्येषां कथ्यमानानि भागशः त्वत्तः श्रुतानि मे ब्रह्मन् पांडवानां च कीर्तय २ ते हि सर्वे महात्मानो
देवराजपराक्रमाः त्वयैवांशावतरणे देवभागाः प्रकीर्तिताः ३ एतदिच्छाम्यहं श्रोतुमतिमानुषकर्मणां तेषामाजननं सर्वं वैशंपायन कीर्तय
४ वैशं राज्ञा पांडुर्महारण्ये मृगव्यालनिषेविते चरन्मैथुनधर्मस्थं ददर्श मृगयूथपं ५ ततस्तां च मृगीं तं च रुक्मपुंखैः सुपत्रिभिः निर्वि
भेद शरैस्तीक्ष्णैः पांडुः पंचभिराशुगैः ६ स च राजन्महातेजा ऋषिपुत्रस्तपोधनः भार्यया सह तेजस्वी मृगरूपेण संगतः ७ संसक्तस्तु तया मृग्या
मानुषीमीरयं[illegible]क्षणेन यतितो भूमौ विललापाकुलेंद्रियः ८ मृग उ च काममन्युपरीता पि बुद्ध्या विरहिता अपि वर्जयंति नृशंसानि पापेष्वपि
रता नराः ९ ॥

नागिरदा।

त्तानि वर्जयंति । अतस्त्वं नृशंसकर्तासर्वेभ्योप्यधमो नरसर्पः ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

आ: विधिं दैवं ग्रसते अतिक्रामतिप्रज्ञाशास्त्रीयाबुद्धिः प्राज्ञः प्राज्ञावान् अर्थान् विधिपर्यागतान् दैवोपगतानन प्रतिपद्यते न च प्राप्नोति किंतु प्रज्ञाबलेनैव एतन्मया साधितमिति मन्यते अतो नापं
२१६ नवापदं इति भावः प्रज्ञावानिति पाठे प्रज्ञावानैवैतज्ज्ञानातिनमूढ इत्यर्थः १० नवापिमोहरत्नाम्ब्रवीमिन्माहशाम्बरिति ११ पाठांतरे मगयुतांमृगं हत्वं १२ अथ घ्नना प्राकघ्नेना
मायया प्रच्छन्नरूपेण। चो वार्षे सत्रमासीनः अनुमिषन्नन्नस्थानोत नापि आहरणं नाम मृगयाप्रदेष्वैव किं पुनर्मम राज्ञः प्रोक्षणेनैनो पाकरणसंज्ञपनादिकं लक्ष्मणं स्वं वा दायस्वपितीति वनम
गयाकृत्वा प्रोक्षयामासेति व्याख्येयं प्रमाणोद्देशः। अस्मान्वर्तमान अगस्त्योसति अगस्त्यस्यपि त्वर्थे मृगया माचरतोऽपचारेणावेदोक्तघनेनयुष्माकं वपाकदलीगर्भपत्रसदृशोमांसाः पूपः

नविधिं ग्रसते प्रज्ञा प्रज्ञां न ग्रसते विधिः विधिपर्यागतानर्थान् प्राज्ञावान् प्रतिपद्यते १० शश्वद्धर्मात्मनो मुख्ये कुले जातस्य भारत कामलोभाभि
भूतस्य कथं ते चलिता मतिः ११ पांडुनु च शत्रूणां पावेषुवतिः सान्मृगाणां वधस्मृता राज्ञां मृगां मां मोहात्वं गर्हितुमर्हसि १२ अथ घ्नना
मायया च मृगाणां वध इष्यते स एव धर्मो राज्ञां तु तद्विद्वन्किं तु गर्हसे अगस्त्यः सत्रमासीनश्चकार मृगयामृषिः आरण्यान्सर्वदैवत्यान्मृगान्प्रोक्ष्य
महावने १३ प्रमाणदृष्टधर्मेण कथमस्मान्विगर्हसे अगस्त्यस्याभिचारेण युष्माकं च वपा हुताः १४ ॥ ॥ छ ॥ ॥ ॥

हुतापर्यग्निकृतानारण्यानुत्सृजतीति शास्त्रे देवतोद्देशेन मत्कानामपि आरण्यानामुत्सर्गे विदधत्त्वद्वधं कुर्वताऽगस्त्येनलंघितांतत्कृतानुगतिकतयावयमपितमेवधर्ममनुस राम०
रतो नभवता दूष्या इत्यभिप्रायोऽर्द्धश्लोकः १३ न रिपून्निति नराः रिपूनसमुद्दिश्य वधे प्रमत्ता क्रांतत्वादिसमयेशरान्मुंचन्ति। अपि तु तेषां वधकालः संग्रामरूपः लोके प्रशस्यते आ २१६
भिमुख्यशस्त्रपाणित्वाघवस्थरूपः १४ ॥

प्रमत्तं असावधानं तीक्ष्णैः गुप्तशस्त्रैराग्नेयादिभिः विवृतं यथा स्यात्तथा घ्नंति मृगान्यत्र भीतपलायमानानां शत्रूणां वधो नीतियो न तु मृगाणामिति आशयः १५ १७ हर्षात् कृत्स्नस्य अंगादि तुल्यः

मृगउ च नरसिंहैः समुद्दिश्य विमुंचंति नराः शरान् रंध्रं एषां विशेषेण वधकालः प्रशस्यते १४ पांडुउ च प्रमत्तमप्रमत्तं वा विवृतं घ्नं
ति चौजसा उपायैर्विविधैस्तीक्ष्णैः कस्मान्मृग विगर्हसे १५ मृगउ च नाहं घ्नंतं मृगान्राजन्विगर्हे चात्मकारणात् मैथुनं तु प्रतीक्ष्यं मे त्वये
हाद्यानृशंस्यतः १६ सर्वभूतहिते काले सर्वभूतेप्सिते तथा को हि विद्वान्मृगं हन्याच्चरंतं मैथुनं वने १७ अस्यां मृग्यां च राजेंद्र हर्षान्मैथुनमा
चरं पुरुषार्थफलं कर्तुं तत्त्वया विफलीकृतं १८ पौरवाणां महाराज तेषामक्लिष्टकर्मणां वंशे जातस्य कौरव्य नानुरूपमिदं तव १९ नृशं
सं कर्म सुमहत्सर्वलोकविगर्हितं अस्वर्ग्यमयशस्यं चाप्यधर्मिष्ठं च भारत २० स्त्रीभोगानां विशेषज्ञः शास्त्रधर्मार्थतत्त्ववित् नार्हस्त्वं
सुरसंकाश कर्तुमस्वर्ग्यमीदृशं २१ त्वया नृशंसकर्तारः पापाचाराश्च मानवाः निग्राह्याः पार्थिवश्रेष्ठ त्रिवर्गपरिवर्जिताः २२ किं कृतं
ते नरश्रेष्ठ मामिहानागसं घ्नता मुनिं मूलफलाहारं मृगवेषधरं हि वै २३ वसमानमरण्येषु नित्यं शमपरायणं त्वयाहं हिंसितो यस्मात्तस्मा
त्त्वामप्यहं शपे २४ द्वयोर्नृशंसकर्तारमवशं काममोहितं जीवितांतकरो भाव एवमेवागमिष्यति २५ अहं हि किंदमो नाम तपसा भावि
तो मुनिः व्यपत्रपन्मनुष्याणां मृग्यां मैथुनमाचरं २६ मृगो भूत्वा मृगैः सार्धं चरामि गहने वने न तु ते ब्रह्महत्येयं भविष्यत्यविजानतः २७
मृगरूपधरं हत्वा मामेवं काममोहितं अस्य तु त्वं फलं मूढ प्राप्स्यसीदृशमेव हि २८ ॥

पुत्रो मे भविष्यतीत्युत्साहात् पुरुषार्थः फलं पुरुषैर्मैथुनेन अर्थनीयं फलं पुत्रं कर्तुं उत्पादयितुं १८ २१ त्रिवर्गेति धर्मार्थकामहीनाः २२ तेत्वयाः २३ द्वयोः स्त्रीपुं
सयोः नृशंसकर्तारं निघसं मैथुनासक्तयोर्वधस्य कर्तारं २४ २८ ॥

आ
२१७

२९ त्वां त्वां अनुगमिष्यति ३० ३२ अध्यायः तं व्यतीतं मत्तं अतिक्रमं अतिशयेन पर्यदेवयत रराज १ कामजालं विधिमाजालं २ ४ देवैः स्कंदस्य अपुत्रत्वात् स्वर्गम
नानर्हस्य ५ मोक्षमार्गव्यवस्थितिनिश्चितो निःश्रेयस्करत्वेन तत्र हि पुत्राद्यनपेक्षा दृष्टा किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति इष्टमेवैतज्ज्ञानमित्याह वंधो हीति

प्रियया सह संवासं प्राप्य कामविमोहितः त्वमप्येतामवस्थायां प्रेतलोकं गमिष्यसि २९ अंतकाले हि संवासे यया गंतासि कांतया प्रेत
राजपुरं प्राप्तं सर्वभूतदुरत्ययं मत्कामनिमित्तं श्रेष्ठ सैव त्वानुगमिष्यति ३० वर्तमानः सुखे दुःखे यथाहं प्रापितस्त्वया तथा त्वां च सुखे
प्राप्तं दुःखमभ्यागमिष्यति ३१ वैशं एवमुक्त्वा सुदुःखार्तो जीवितात्स व्यमुच्यत मृगः पांडुश्च दुःखार्तः क्षणेन समपद्यत ३२ इत्यादि
पर्वणि संभवे वैशं तं व्यतीतमतिक्रम्य राजा स्वमिव बांधवं सभार्यः शोकदुःखार्तः पर्यदेवयदातुरः १ पांडुरु च सतामपि कुले जाताः
कर्मणा स्वेन दुर्गतिं प्राप्नुवंत्यकृतात्मानः कामजालविमोहिताः २ शश्वद्धर्मात्मना जातो बाल एव पिता मम जीवितांतमनुप्राप्तः का
मात्मैवेति नः श्रुतं ३ तस्य कामात्मनः क्षेत्रे राज्ञः संयतवागृषिः कृष्णद्वैपायनः साक्षाद्भगवान्मामजीजनत् ४ तस्याद्य व्यसने बुद्धिः ७
संजातेयं ममाधमा त्यक्तस्य दैवेन यान्मृगयां परिधावतः ५ मोक्षमेव व्यवस्यामि बंधो हि व्यसनं महत् सुवृत्तिमनुवर्त्स्ये तामहं पितुरव्य ण
यां ६ अतीव तपसात्मानं योजयिष्याम संशयः तस्मादेकोहमे कीमेकैकस्मिन्वनस्पतौ चरन्भैक्षं मुनिर्मुंडश्चरिष्यामि महीमिमा
का१

वंधः पुत्रैषणादिः सुवृत्तिं ब्रह्मचर्यरूपां वृत्तिं पितुर्व्यासस्य ६ तपसा श्रवणमनननात्मकेन आलोचनेन आत्मानं चित्तं योजयिष्यामि समाधानुमिष्यामि तत्र साधनान्या
ह तस्मादिति एकः स्त्रीहीनः एकाकी शिष्यादिभिः सहायैर्हीनः इमान्संनिहितान् ७ ॥

राम॰
२१७

म° १

पांसुनेतिमूत्रिस्थापितमुक्तं ८ निराशीर्निर्नमस्कारः आशिषं नमस्कारं वा नेच्छामीत्यर्थः निर्द्वन्द्वः सुखदुःखादिहीनः निःपरिग्रहः कंथायारुकादिवर्जितः ९ १० पूर्वस
न्यासधर्मान करिष्यामीत्युक्तं इदानीं सन्न्यासमेव करिष्यामी[illegible]त्याह एककालमिति पूर्वलाभे पूर्वं एकैकस्मिन्वनस्पतौ चरन्भैक्षमित्युक्तं तदभावे सति कुलानि गृह्णाति

पांसुना समवच्छन्नः शून्यागारकृतालयः वृक्षमूलनिकेतो वा त्यक्तसर्वप्रियाप्रियः ८ न शोचन्न प्रहृष्यंश्च तुल्यनिंदात्मसंस्तुतिः
निराशीर्निर्मनस्कारो निर्द्वन्द्वो निःपरिग्रहः ९ न चाप्यवहसन्किंचिन्न कुर्वन्भ्रुकुटीं क्वचित् प्रसन्नवदनो नित्यं सर्वभूतहिते रतः १० जंग
माजंगमं सर्वमविहिंसंश्चतुर्विधं स्वासु प्रजास्विव सदा समः प्राणभृतः प्रति ११ एककालं चरन्भैक्षं कुलानि दश पंच वा असंभवे च भै
क्ष्यस्य चरन्ननशनान्यपि अल्पमल्पं च भुंजानः पूर्वलाभेन जातु चित् १२ अन्यान्न विचरल्लोभादलाभे सप्तपूरयेत् अलाभे यदि वा लाभे सम
दर्शी महातपाः १३ वासैकं तक्षतो वाहुं चंदनेनैकमुक्षतः नाकल्याणं न कल्याणं चिंतयन्नुभयोस्तयोः १४ न जिजीविषुवत्किंचिन्न मुमूर्षु
वदाचरन् जीवितं मरणं चैव नाभिनंदन्न च द्विषन् १५ याः काश्चिज्जीवता शक्याः कर्तुमभ्युदयक्रियाः ताः सर्वाः समतिक्रम्य निमेषादिष्वव
स्थितः १६ ॥

सार्द्धश्लोकः १२ न जातु चित न कदाचित् लोभादन्यानि दशाधिकानि चरन् अलाभे अप्रवृत्तौ १३ वासा वासैन काष्ठतक्षणेन सुपोऽडादेशः आर्षो विभक्तिलोपो
वा १४ १५ आभ्युदयक्रियाः स्वर्गादिहेतवो दर्शपूर्णमासाद्याः समतिक्रम्य प्राजापत्येष्ट्यादिपूर्वकं ताः विधिवत्त्यक्त्वा निमेषादिकालः तत्र व्यवस्थितः अनियतका
ला १६ ॥

आ॰ अनवस्थासु अनिमफलासु संपरित्यक्तः धर्मसाध्यो येन ब्रह्मलोकान्नीयेन सः सुनिर्णिक्तात्मकल्मषः यस्माद्धर्मेणासम्यक्क्षालितं चित्तकल्मषं रागादि तस्मात्तेन कृतार्थेन
११८ नातः परं कार्यमस्तीत्यर्थः १७ रागादिक्षयोपि तन्मूलभूतया पृक्ष्यादेवेत्याह निर्मुक्त इति वागुराः एव वागुरा बंधनानि अविद्याकामकर्माणि सर्वमोच्यसंगः १८ सं
स्थापयिष्यामि निर्भयं संसारभयरहितं १९ सकृपणो वाहं साधनाधीनेकर्ममये यो वा एतदक्षरं गार्ग्यविदित्वास्मिंल्लोके यजति ददाति तपस्तप्यतेपि बहूनि वर्ष
सहस्राण्यंतवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतिनिंदिते स्ववीर्यक्षयशोचिते स्वस्य प्रत्यगात्मनो वीर्ये सर्वस्येशानः सर्व
स्याधिपतिरिति श्रुतिप्रसिद्धं वशित्वादि तत्सक्षयो देहेंद्रियविषयसंगकृतो ह्रासः तेन शोचिते शोच्ये ननु न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः श्राद्धकृत्सत्यवादी च गृह

नास्त्रुवाप्यनवस्थासु त्यक्तसर्वेंद्रियक्रियाः संपरित्यक्तधर्मार्थः सुनिर्णिक्तात्मकल्मषः १७ निर्मुक्तः सर्वपापेभ्यो विमुक्तः सर्ववागुराः न वशे
कस्यचित्तिष्ठन् स्वधर्मा मातरिश्वनः १८ एतया सततं धृत्वा चरन्नेवंप्रकारया देहं संस्थापयिष्यामि निर्भयं मार्गमास्थितः १९ नाहं सकृपणो मा
र्गे स्ववीर्यक्षयशोचिते स्वधर्मात्सततो येते चरेयं वीर्यवर्जितः २० सत्कृतोसत्कृतो वापि यो नं कृपणचक्षुषा उपेतिहन्निकामात्मा स श्वनावर्त्तेप
थि २१ वैशं एवमुक्त्वा सुदुःखार्तो निश्वासपरमो नृपः अवेक्षमाणः कुंती च माद्री च समभाषत २२ कौशल्या विदुरः क्षत्ता राजा च सहबंधु
भिः आर्या सत्यवती भीष्मस्ते चान्ये राजपुरोहिताः २३ ब्राह्मणाश्च महात्मानः सोमपाः शंसितव्रताः पौरवृद्धाश्च ये तत्र निवसंत्यस्मदाश्रयाः प्रसाद्य
सर्वे वक्तव्याः पांडुः प्रव्रजितो वनं २४ ॥

स्योपि विमुच्यत इति स्मृतेः गृह एव मोक्षसिद्धौ किं संन्यासेनेत्याशंक्याह स्वधर्मादिति न्यायामेस्मादस्य प्रजायेयेति श्रुतेः प्रजोत्पादनमेव गृहस्थधर्मः ततश्च्युतेन गार्ह
स्थ्ये किमवस्थानेनेत्याशयः वीर्यवर्जितः अपत्योत्पादनसामर्थ्यरहितः २० अपत्योत्पादनमपि ब्राह्मणद्वारा सुसंपाद्यमित्याशंक्याह सत्कृत इति अन्यं पुरुषं व
त्रिंदन्निप्रदं कृपणया चक्षुषा अपत्यं मे देहीति याञ्चादीनदृष्ट्या कामात्मा अपत्यकामः आत्माविवित्तयस्मात् कामपूर्त्यैन्ते श्वनामिव अपत्यकामानामपि न कृतं महद्दुःख

मस्ति अतः पारिव्राज्यमेव श्रेय इति भावः २१ २२ क्षत्तात्र विदुर एव कौशल्यादिसाहचर्यात् २३ २४

रामं ११८

तत्समं उक्तस्य योग्यं २५ ३३ विमत्सरः हिंसादिदोषं पक्वा पक्वेनापक्वे पक्वे पक्वं फलादि अपक्वं कंदादि पक्षांतकर्म इष्ट्यादिकं पक्षः तदन्यत् अग्निहोत्राह्निकमयमस्य
३४ वानप्रस्थजनस्यापि दर्शने अप्रियाणि आचनाचरिष्यामि तथा कुलवासिनां भ्रात्रादीनां ३५ आरण्यकाः वानप्रस्थास्तेषां शास्त्राणि धर्मविधायकानि तेषां म

निशम्य वचनं भर्तुर्वनवासे धृतात्मनः तत्समं वचनं कुंती माद्री च समभाषत २५ अन्येपि ह्याश्रमाः संति ये शक्या भरतर्षभ आवाभ्यां धर्मप
त्नीभ्यां सह तप्त्वा तपो महत् २६ शरीरस्यापि मोक्षाय स्वर्ग्यं प्राप्य महाफलं त्वमेव भविता भर्ता स्वर्गस्यापि न संशयः २७ प्रणिधायेंद्रियग्रामं भ
र्तृलोकपरायणे त्यक्त्वा कामसुखे ह्यावां तप्स्यावो विपुलं तपः २८ यदि चावां महाप्राज्ञ त्यक्ष्यसि त्वं विशांपते अद्यैवावां प्रहास्यावो जीवितं ना
त्र संशयः २९ पांडुरु च यदि व्यवसितं ह्येतद्युवयोर्धर्मसंहितं स्ववृत्तिमनुवर्त्स्येतामहं पितुरव्ययां ३० त्यक्त्वा ग्राम्यसुखाहारं तप्यमानो म
हत्तपः वल्कली फलमूलाशी चरिष्यामि महावने ३१ अग्नौ जुह्वन्नुभौ कालावुभौ कालावुपस्पृशन् कृशः परिमिताहारश्चीरचर्मज
टाधरः ३२ शीतवातातपसहः क्षुत्पिपासानवेक्षकः तपसा दुश्चरेणेदं शरीरमुपशोषयन् ३३ एकांतशीलो विमृशन्पक्वापक्वेन वर्त्तयन्
पितॄन्देवांश्च वन्येन वाग्भिरद्भिश्च तर्पयन् ३४ वानप्रस्थजनस्यापि दर्शनं कुलवासिनां नाप्रियाण्याचरिष्यामि किं पुनर्ग्रामवासिनां ३५
एवमारण्यशास्त्राणामुग्रमुग्रतरं विधिं कांक्षमाणोहमास्यामि देहस्यास्य समापनात् ३६ ॥ ॥

हः ३ जनं २

ध्येविहितं उग्रं उग्रतरं आस्यासे अंगीकरिष्ये आसमाप्तेः नानयावत्समाप्तिं ३६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प

श्रा निष्कंग्रैवेयकं ३७ ३८ रतिंस्त्रीसंगंपरमात्मिकांपरमः नूतननतादुष्कृतः आत्मा आत्मावैपुत्रनामासीन्निष्कृतेः पुत्रः सपयातां ३९ ४० ४१ ४२ ४३ ४४
२१६

वैशंपायनउवाच इत्येवमुक्त्वाभार्येतेराजाकौरवनंदनः ततश्चूडामणिंनिष्कमंगदेकुंडलानिच ३७ वासांसिचमहार्हाणिस्त्रीणामाभ
रणानिच प्रदायसर्वविप्रेभ्यःपांडुःपुनरभाषत ३८ गत्वानागपुरंवाच्यंपांडुःप्रव्रजितोवनं अर्थंकामंसुखंचैवरतिंचपरमात्मिकां प्रतस्थे
सर्वमुत्सृज्यसभार्यःकुरुनंदनः ३९ ततस्तस्यानुयातारस्तेचैवपरिचारकाः श्रुत्वाभरतसिंहस्यविविधाःकरुणागिरः भीममार्त्तस्वरंकृ
त्वाहाहेतिपरिचुक्रुशुः ४० उष्णमश्रुविमुंचंतस्तंविहायमहीपतिं ययुर्नागपुरंतूर्णंसर्वमादायतद्धनं ४१ तेगत्वानगरंराज्ञोयथावृ
त्तंमहात्मनः कथयांचक्रिरेराज्ञस्तद्धनंविविधंददुः ४२ श्रुत्वातेभ्यस्ततःसर्वंयथावृत्तंमहावने धृतराष्ट्रोनरश्रेष्ठःपांडुमेवान्वशोच
त ४३ नशय्यासननभोगेषुरतिंविंदतिकर्हिचित् भ्रातृशोकसमाविष्टस्तमेवार्थंविचिंतयन् ४४ राजपुत्रस्तुकौरव्यपांडुर्मूल
फलाशनः जगामसहपत्नीभ्यांततोनागशतंगिरिं ४५ सचैत्ररथमासाद्यकालकूटमतीत्यच हिमवंतमतिक्रम्यप्रययौगंधमादनं ४६
रक्ष्यमाणोमहाभूतैःसिद्धैश्चपरमर्षिभिः उवाससमहाराजसमेषुविषमेषुच ४७ इंद्रद्युम्नसरःप्राप्यहंसकूटमतीत्यच शतशृंगेमहा
राजतापसःसमतप्यत ४८ इत्यादिपर्वणिपांडुचरिते ११७ वैशंपायनउवाच तत्रापितपसिश्रेष्ठेवर्त्तमानःसवीर्यवान् सिद्धचारण
संघानांबभूवप्रियदर्शनः १

४५ ४६ ४७ ४८ अध्यायःतत्रापि १ १ ॥ ४ ॥ ॥ ॥ ॥

राम०
२१६

२ परिपालयन्नृडभावश्चार्षः ३ ४ अमावास्यांप्राप्य ५ ६ विमानशतेनसंबाधसंकटंयस्यांसासंबाधः संकटेमगेइतिमेदिनी १० १२ सिद्धाश्चपरमर्षयइतिवक्ष्यमा

शुश्रूषुरनहंवादीसंयतात्माजितेंद्रियः स्वर्गंगंतुंपराक्रांतः स्वेनवीर्येणभारत २ केषांचिदभवद्भ्राताकेषांचिदभवत्सखा ऋषय
स्त्वपरेचैनंपुत्रवत्परिपालयन् ३ सतुकालेनमहताप्राप्यनिःकल्मषंतपः ब्रह्मर्षिसदृशःपांडुर्बभूवभरतर्षभ ४ अमावास्यांतुस
हिताऋषयःसंशितव्रताः ब्रह्माणंद्रष्टुकामास्तेसंप्रतस्थुर्महर्षयः ५ संप्रयातान्तानृषीन्दृष्ट्वापांडुर्वचनमब्रवीत् भवंतःक्वगमि
ष्यंतिब्रूतमेवदतांवराः ६ ऋषयऊचुः समवायोमहानद्यब्रह्मलोकेमहात्मनां देवानांचऋषीणांचपितॄणांच महात्म
नां वयंतत्रगमिष्यामोद्रष्टुकामाःस्वयंभुवं ७ वैशंपायनउवाच पांडुरुत्थायसहसागंतुकामोमहर्षिभिः स्वर्गपारंतितीर्षुःसशतशृं
गादुदङ्मुखः प्रतस्थेसहपत्नीभ्यामब्रुवंस्तंचतापसाः ८ उपर्युपरिगच्छंतःशैलराजमुदङ्मुखाः दृष्टवंतोगिरेरस्यदुर्गान्देशान्बहून्व
यं ९ विमानशतसंबाधांगीतस्वरनिनादितां आक्रीडभूमिंदेवानांगंधर्वाप्सरसांतथा १० उद्यानानिकुबेरस्यसमानिविषमाणिच
महानदीनितंबांश्चगहनान्गिरिगह्वरान् ११ संतिनित्यहिमादेशानिर्वृक्षमृगपक्षिणः संतिक्वचिन्महादर्योदुर्गाःकाश्चिद्दुरा
सदाः १२ नातिक्रामेतपक्षीयान्कुतएवेतरेमृगाः वायुरेकोहियात्यत्रसिद्धाश्चपरमर्षयः १३ गच्छंत्यौशैलराजेस्मिन्राजपुत्र्यौक
थंत्विमे नसीदेतामदुःखार्हेमागमोभरतर्षभ १४

णात्कारणचतुष्टयनिर्मुक्ताःसिद्धाः दिव्यज्ञानवंतःपरमर्षयः तेपियांतित्वंतुनतथेतिभावः १३ तत्रलोकदृष्टंहेतुमाहगच्छंत्याविति १४ ॥ ॥

आ॰
२२०

तमेवं मुनीनामाशयं बुद्ध्वा पांडुरुवाच अप्रजस्येति न परिचक्षते परितः सर्वथा न पश्यंति १५ नाशो ममैव यतः पितॄणां मेष निश्चय अप्रजस्य स्वर्गद्वारनिरोधन यज्ञादिकं वि
फलीकर्तुं व्यमितेनेष निश्चयः पितॄणां तेन तन्नाद्दशो स्वर्गः भूमौ सन्नपि न दृष्टप्राय एव किमुत देहनाशे इति भावः १६ एतदेव विवृणोति ऋणैरित्यादिना १७ १८ १९ ऋषि

पांडुरुवाच अप्रजस्य महाभागा न द्वारं परिचक्षते स्वर्गे तेनाभितप्तोहमप्रजस्तद्ब्रवीमि वः १५ पित्र्यादृणादनिर्मुक्तस्तेन तप्ये तपोधनाः
देहनाशे ध्रुवो नाशः पितॄणामेष निश्चयः १६ ऋणैश्चतुर्भिः संयुक्ता जायंते मानवा भुवि पितृदेवर्षिमनुजैर्देयं तेभ्यश्च धर्मतः १७ एतानि तु
यथाकालं यो न बुध्यति मानवः न तस्य लोकाः संतीति धर्मविद्भिः प्रतिष्ठितं १८ यज्ञैश्च देवान्प्रीणाति स्वाध्यायतपसा मुनीन् पुत्रैः श्राद्धैः
पितॄंश्चापि आनृशंस्येन मानवान् १९ ऋषिदेवमनुष्याणां परिमुक्तोस्मि धर्मतः त्रयाणामितरेषां तु नाश आत्मनि नश्यति २० पित्र्यादृ
णादनिर्मुक्त इदानीमस्मि तापसाः इह तस्मात्प्रजाहेतोः प्रजायंते नरोत्तमाः २१ यथैवाहं पितुः क्षेत्रे जातस्तेन महर्षिणा तथैवास्मिन्मम क्षेत्रे
कथं वै संभवेत्प्रजा २२ ऋषय ऊचुः अस्ति वै तव धर्मात्मन्विद्मो देवोपमं शुभं अपत्यमनघं राजन्वयं दिव्येन चक्षुषा २३ देवोदि
ष्टं नरव्याघ्र कर्मणेहोपपादय अक्लिष्टं फलमव्यग्रो विंदते बुद्धिमान्नरः २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

देवमनुष्याणां ऋणादिति शेषः इतरेषां पितॄणां ऋणात्तु नाशः अप्रकाशनतां मम आत्मवि देहेन श्यतीसतिसोयं लोकः पुत्रेणैव जय्यो नान्येन कर्मणेति श्रुतेः स्व
देहनाशे पितृत्वरूपेणात्मैव [yellow-highlighted, illegible] पुत्राभावे तु नाशो वेसर्थः तदेवाह पित्र्यादृणादिति २१ २३ दैवोदिष्टं दृष्टादृष्टकारणकलापजन्यं कर्म
मात्रसेसर्थः अव्यग्रो विंदते नोव्यग्रो मामूदिसर्थः २४ न१
रामः
२२०

लभतेऽनिलब्धा नाहं शोचिलस्मासीत् अर्थः २५ क्रियां पुत्रोत्पादिकां २६ २७ धर्मसंहिता धर्ममयी २८ ३० मृगाभिशापात् मृगरूपस्य मुनेः शापात् नष्टं असद्रूपं ज्ञातं
जननं स्त्रीसंगात्मकं रतिकर्म यत उपहतं यथा मृगस्य तथैवांतरा मे पुनर्ममापि मरणप्राप्तिर्निश्चयात् न तु क्लीवत्वात् ३१ धर्मदर्शने धर्मशास्त्रे उक्ता इति शेषः बंधुदायादाः रिक्थ
हराः अबंधुदायादा लब्धे ३२ षडाधानीह स्वयंजातः ऊढायां वोढुः सकाशाज्जातः १ तस्यामेवान्यमानुग्रहाज्जातः प्रणीतः २ परिक्रीतः रेतोमूल्यदानेन तस्यामेव जनितः ३ पौ

तस्मिन्दृष्टफले राजन्नपत्यं कर्तुमर्हसि अपत्ये गुणसंपन्ने लब्धा प्रीतिकरं ह्यसि २५ वैशंपायन उ० च तच्छ्रुत्वा तापसवचः
पांडुश्चिंतापरोऽभवत् आत्मनो मृगशापेन जानन्नुपहतां क्रियां २६ सोऽब्रवीद्विजने कुंतीं धर्मपत्नीं यशस्विनीं अपत्योत्पाद
नेयत्नमापदि त्वं समर्थयन् २७ अपत्यं नाम लोकेषु प्रतिष्ठा धर्मसंहिता इति कुंति विदुर्धीराः शाश्वतं धर्मवादिनः २८ इष्टं दत्तं
तपस्तप्तं नियमश्च स्वनुष्ठितः सर्वमेवानपत्यस्य न पावनमिहोच्यते २९ सोऽहमेवं विदित्वैतत्प्रपश्यामि शुचिस्मिते अनपत्यः
शुभाँल्लोकान्न प्राप्स्यामीति चिंतयन् ३० मृगाभिशापान्नष्टं मे जननं ह्यकृतात्मनः नृशंसकारिणो भीरु यथैवोपहतं
पुरा ३१ इमे वै बंधुदायादाः षट् पुत्रा धर्मदर्शने षडेवाबंधुदायादाः पुत्रास्तांश्शृणु मे पृथे ३२ स्वयंजातः प्रणीतश्च परि
क्रीतश्च यः सुतः पौनर्भवश्च कानीनः स्वैरिण्यां यश्च जायते ३३ ॥ ॥

नर्भवः पूर्वमन्येन ऊढा पश्चादन्येन तस्यां द्वितीयेन जातो धर्मतो यद्यपि पूर्वं स्वक्षेत्रजस्त्यापितस्यापि परिणेतृत्वात्तदीय एव ४ कानीनः विवाहात्प्रागेव अस्यां यो जायते
पुत्रः स मे पुत्रो भविष्यतीति समयबंधेन यादीयते तस्यासुतस्त्र ५ स्वैरिण्यामपूढायामेवानीचाज्जातः कुंडनामा ६ एतेषाद्यचतुर्थौ औरसौ पंचमो व्यवहितोरसः इत
रे क्षेत्रजास्त्रयः ३२ ३३ ॥ ॥

आ· २२१

अथ षडबंधुदायादाः दत्तः मातापितृभ्यां समर्पितः १ क्रीतः धनादिकं दत्वा गृहीतः २ कृत्रिमश्चेति वकारेभिन्नक्रमः क्रीतश्चेति संबंधः कृत्रिमः उक्तप्रकाराह्

काभावेपि यः स्वयं उपगच्छेत् अहं तव पुत्रोस्मीति स्वयमागतस्तृतीयः ३ सहोढः यस्य माता गर्भवत्येव कृता स चतुर्थः ४ कर्णादिसदृशस्य कानीनस्याप्यत्रैवांतर्भावः

ज्ञातिरेताः अवहितभ्रात्रादेः पुत्रः पंचमः ५ सर्वेषामेकपुत्राणां यद्येकोपि भवेत्सुतः सर्वे तेनैव पुत्रेण पुत्रिणो मनुरब्रवीदिति स्मृतेः साक्षाद्भ्रातृपुत्रस्य औरसत्वाविशेषा

दत्तः क्रीतः कृत्रिमश्च उपगच्छेत्स्वयं च यः सहोढो ज्ञातिरेताश्च हीनयोनिधृतश्च यः ३४ पूर्वपूर्वतमाभावं मत्वा लिप्सेत वै सुतं उत्तमादेव

र्णात्तु सः काङ्क्षन्ते पुत्रमापदि ३५ अपत्यं धर्मफलदं श्रेष्ठं विंदन्ति मानवाः आत्मशुक्रादपि पृथे मनुः स्वायंभुवोऽब्रवीत् ३६ तस्मात्प्रहेष्याम्यद्य त्वां

हीनः प्रजननात्स्वयं सदृशाच्छ्रेयसो वा त्वं विद्ध्यपत्यं यशस्विनी ३७ शृणु कुंति कथामेतां शारदंडायनीं प्रति सा वीरपत्नी गुरुणा नियुक्ता पुत्रजन्म

नि पुष्पेण प्रयता स्नाता निशि कुंति चतुष्पथे ३८ वरयित्वा द्विजं सिद्धं हुत्वा पुंसवनेऽनले कर्मण्यवसिते तस्मिन्सा तेनैव सहावसत् ३९ तत्र त्री

ञ्जनयामास दुर्जयादीन्महारथान् तथा त्वमपि कल्याणि ब्राह्मणात्तपसाधिकात् मन्नियोगाद्यतक्षिप्रमपत्योत्पादनं प्रति ४० ६ दि वे

सं वे ११८ ॥ ॥

न हीनयोनौ धृतः उत्पादितः षष्ठः ६ ४ प्रणीतेविशेषमाह उत्तमादिति ३५ श्रेष्ठं पितुः कुलादपि यः प्रशासनमलंतुं श्रेष्ठमपत्यमिति सामानाधिकरण्यं श्रेष्ठा

दत्तत्वादपत्यस्य ३६ प्रहेष्यामि गतिवृद्धिकर्मणो हिनोतेः अद्यतिक्षिप्रवचनसंयोगाल्लृट् त्वां शरणं गतास्मि वर्द्धयामि वेति वार्थः ३७ शारदंडायनी भार्या

गुरुणा भर्त्रा पुष्पेण आर्तवेन उपलक्षितेन प्रयाता रजस्वला स्नानवता चतुष्पथे हि ३८ ३९ यतयतस्व ४० अध्यायः ११८ ॥ ॥ ॥ ॥ राम· २२१

एवं १० अकालयन्वशीकृतवान ११ १४ जहारकृतवानसोमसंस्थाः अग्निष्टोमानग्निष्टोमादयः सप्त १५

वैशं एवमुक्त्वामहाराजकुंतीपांडुमभाषत कुरूणामृषभंवीरंतदाभूमिपतिंपतिं १ नमामर्हसिधर्मज्ञवक्तुमेवंकथंचन धर्मपत्नीमभिरतांत्व
यिराजीवलोचन २ त्वमेववतुमहावाहोमय्यपत्यानिभारत वीरवीर्योपपन्नानिधर्मतोजनयिष्यसि ३ स्वर्गंमनुजशार्दूलगच्छेयंसहितात्वया अपत्या
यचमांगच्छत्वमेवकुरुनंदन ४ नह्यहंमनसाप्यन्यंगच्छेयंत्वदृतेनरं त्वत्तःप्रतिविशिष्टश्चकोन्योस्तिभुविमानवः ५ इमांचतावद्धर्म्यात्मन्पौराणीं
शृणुमेकथां परिश्रुतांविशालाक्षकीर्तयिष्यामियामहं ६ व्युषिताश्वइतिख्यातोवभूवकिलपार्थिवः पुरापरमधर्मिष्ठःपूरोर्वंशविवर्द्धनः ७ त
स्मिंश्चयजमानेवैधर्मात्मनिमहाभुजे उपागमंस्ततोदेवाःसेंद्रादेवर्षिभिःसह ८ अमाद्यदिंद्रःसोमेनदक्षिणाभिर्द्विजातयः व्युषिताश्वस्यराजर्षेस्त
तोयज्ञेमहात्मनः देवाब्रह्मर्षयश्चैवचक्रुःकर्मस्वयंतदा ९ व्युषिताश्वस्ततोराजन्नतिमर्त्यान्व्यरोचत सर्वभूतान्यपियथातपनःशिशिरात्य
ये १० सविजित्यगृहीत्वाचनृपतीन्राजसत्तम प्राच्यानुदीच्यान्मध्यांश्च दक्षिणात्यानकालयत ११ अश्वमेधेमहायज्ञेव्युषिताश्वःप्रतापवा
न् वभूवसहिराजेंद्रोदशनागवलान्वितः १२ अप्यत्रगाथागायंतियेपुराणविदोजनाः व्युषिताश्वेयशोवृद्धेमनुष्येंद्रेकुरूत्तम १३ व्युषि
ताश्वःसमुद्रांतांविजित्येमांवसुंधरां अपालयत्सर्ववर्णान्पितापुत्रानिवौरसान १४ यजमानोमहायज्ञैःब्राह्मणेभ्योधनंददौ अनंतरत्नान्या
दायसंजहारमहाक्रतून सुषाववचवहून्सोमान्सोमसंस्थास्ततानच १५ ॥ ॥

काक्षीवती काक्षीवतो दुहिता १६ २१ मृतं मरणं अमृतं मुक्तिर्वा न तु ब्रह्मलोकान्तमैश्वर्यं २२ २३ अनिवर्त्तितुं गच्छन्तं म्रियमाणामित्यर्थः २४ २५ आधयो

आसीत्काक्षीवती चास्य भार्या परमसंमता भद्रा नाम मनुष्येन्द्र रूपेणासदृशी भुवि १७ कामयामास तं तौ च परस्परमिति श्रुतं स तस्यां
कामसंपन्नो यक्ष्मणा समपद्यत १८ तेनाचिरेण कालेन जगामास्तमिवांशुमान् तस्मिन्प्रेते मनुष्येन्द्रे भार्यास्य भृशदुःखिता १९ अ
पुत्रा पुरुषव्याघ्र विललापेति नः श्रुतं भद्रा परमदुःखार्त्ता तन्निबोध जनाधिप २० भद्रा च नारी परमधर्मज्ञ सर्वा भर्तृविनाकृता
पतिं विना जीवति या न सा जीवति दुःखिता २१ पतिं विना मृतं श्रेयो नार्याः क्षत्रियपुंगव त्वद्गतिं गन्तुमिच्छामि प्रसीदस्व नयस्व मां २२
त्वया हीना क्षणमपि नाहं जीवितुमुत्सहे प्रसादं कुरु मे राजन्नितस्तूर्णं नयस्व मां २३ पृष्ठतोऽनुगमिष्यामि समेषु विषमेषु च त्वामहं नर
शार्दूल गच्छन्तमनिवर्त्तितुं २४ छायेवानुगता राजन्सततं वशवर्त्तिनी भविष्यामि नरव्याघ्र नित्यं प्रियहिते रता २५ अद्य प्रभृति मां राज
न्कष्टा हृदयशोषणाः आधयोऽभिभविष्यन्ति त्वामृते पुष्करेक्षण २६ अभाग्यया मया नूनं वियुक्ताः सहचारिणः तेन मे विप्रयोगोऽयमुप
पन्नस्त्वया सह २७ विप्रयुक्ता तु या पत्या मुहूर्त्तमपि जीवति दुःखं जीवति सा पापा नरकस्थेव पार्थिव २८ संयुक्ता विप्रयुक्ताश्च पूर्वदे
हे कृता मया तदिदं कर्मभिः पापैः पूर्वदेहेषु संचितं २९ दुःखं मामनुसंप्राप्तं राजंस्त्वद्विप्रयोगजं अद्य प्रभृत्यहं राजन्कुशसंस्तरशायि
नी भविष्याम्यसुखाविष्टा त्वद्दर्शनपरायणा ३० ॥

मनोव्यथाः २६ सहचारिणः मिथुनिनः २७ २८ २९ ३० ॥ ॥ ॥ ॥ ॥ ॥ ॥

३१ शवं प्रेतशरीरं संपरिष्वज्य विललापं तामित्यन्वयः २२ ३७ अध्यायः १२३ अनावृताः सर्वैर्द्रष्टुं योग्याः कामचारो रतिसुखं तद्रूपविहारिण्यः पर्यटनशीलाः स्वं

दर्शयस्व नरव्याघ्र साधिमाम सुखान्वितां कृपणां त्वनाथां करुणां विलपंतीं नरेश्वर ३१ कुंतु च एवं बहुविधं तस्यां विलपंत्यां पुनः पुनः
तं शवं संपरिष्वज्य वाक्किलांतर्हिताब्रवीत् ३२ उत्तिष्ठ भद्रे गच्छ त्वं ददानीह वरं तव जनयिष्याम्यपत्यानि त्वय्यहं चारुहासिनि ३३ आत्मकी
ये वरारोहे शयनीये चतुर्दशीं अष्टमीं वा ऋतुस्नातां संविशेथा मया सह ३४ एवमुक्ता तु सा देवी तथा चक्रे पतिव्रता यथोक्तमेव तद्वाक्यं भ
द्रा पुत्रार्थिनी तदा ३५ सा तेन सुषुवे देवी शवेन भरतर्षभ त्रीन् शाल्वांश्चतुरो मद्रान् सुतान् भरतसत्तम ३६ तथा त्वमपि मय्येवं मनसा भरतर्ष
भ शक्तो जनयितुं पुत्रान् तपोयोगबलान्वितः ३७ इत्यादिपर्वणि संभवे वैशंपायन उ च एवमुक्तस्तया राजा तां देवीं पुनरब्रवीत् धर्मवि
द्धर्मसंयुक्तमिदं वचनमुत्तरं १ पांडुरु च एवमेतत्पुरा कुंति व्युषिताश्वश्चकार ह यथा त्वयोक्तं कल्याणि स ह्यासीदमरोपमः २ अथ त्विदं प्र
वक्ष्यामि धर्मतत्त्वं निबोध मे पुराणमृषिभिर्दृष्टं धर्मविद्भिर्महात्मभिः ३ अनावृताः किल पुरा स्त्रिय आसन् वरानने कामचारविहारिण्यः स्व
तंत्राश्चारुहासिनि ४ तासां व्युच्चरमाणानां कौमारात् सुभगे पतीन् नाधर्मोभूद्वरारोहे स हि धर्मः पुराभवत् ५ ॥ ॥ ॥ ॥ ॥

तंत्राः भर्त्रादिभिरनिवार्याः ४ पतीन् व्युच्चरमाणानां व्यभिचरंतीनां ५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

आः
२२३

अनुविधीयंते अनुसार्य्यंते ६ दृश्यते चवेदेनकांचनपरिहारे इतिवामदेव्यव्रतेषुश्रुतेःपुनात्पिन्ताः स्त्रियाः प्रत्याख्यानेननिषेधः ७ नचिरात् अल्पकालतः ८ ९ १०

१ श्रुतम् ३

तं चैव धर्मं पौराणं तिर्य्यग्योनिगताः प्रजाः अद्याप्यनुविधीयंते कामक्रोधविवर्जिताः ६ प्रमाणदृष्टो धर्मोयं पूज्यते च महर्षिभिः उत्तरेषु च रंभोरु कुरुष्वद्यापि पूज्यते ७ स्त्रीणामनुग्रहकरः स हि धर्मः सनातनः अस्मिंस्तु लोके नचिरान्मर्यादेयं शुचिस्मिते स्थापिता येन यस्माच्च तन्मे विस्तरतः शृणु ८ बभूवोद्दालको नाम महर्षिरिति नः श्वेतकेतुरिति ख्यातः पुत्रस्तस्याभवन्मुनिः ९ मर्यादेयं कृता तेन धर्म्या वै श्वेतकेतुना कोपात्कमलपत्राक्षि यदर्थं तन्निबोध मे १० श्वेतकेतोः किल पुरा समक्षं मातरं पितुः जग्राह ब्राह्मणः पाणौ गच्छाव इति चाब्रवीत् ११ ऋषिपुत्रस्ततः कोपं चकारामर्षचोदितः मातरं तां तथा दृष्ट्वा नीयमानां बलादिव १२ क्रुद्धं तं तु पिता दृष्ट्वा श्वेतकेतुमुवाच ह मा तात कोपं कार्षीस्त्वमेष धर्मः सनातनः १ अनावृता हि सर्वेषां वर्णानामंगना भुवि यथा गावः स्थितास्तात स्वे स्वे वर्णे तथा प्रजाः १४

श्वेतोकेतोर्मातरं पितुः समक्षं नचैमे क्षमां कृतवान् ११ १२ १३ स्थिताः व्यवस्थिताः १४ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥ ॥

८१